
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
भागवत कथा प्रथमस्कंध	श्रीकृष्ण देव	पुराण	पूर्ण		4/14	525	संस्कृत	कागज	14	60		

M-2986

नः पतिरेक आसीदिति श्रुतेः नेत्याह तेन इति आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यस्तेने प्रकाशितवान् यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च व्याहरत नाम स्वप्रहिणो ति तं ह स्मान्तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः ननु ब्रह्मणोऽन्यतो वेदाध्ययनं प्रसिद्धं सत्यं तत्तु हृदा मनसैव तेने अनेन बुद्धिवृत्तिप्रवर्तकत्वेन गा यत्र्यादर्शितः वक्ष्यति हि प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति ननु

ॐ नमो भगवते वासुदेवाय जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभि
ज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ॥ ॥

ब्रह्मा स्वयमेव सुप्रबुद्धन्यायेन वेदमुपलभतां नेत्याह यस्मिन् ब्रह्मणि सूरयोऽपि मुह्यन्ति तस्माद् ब्रह्मणोऽपि पराधीनज्ञानत्वात् स्वतः सिद्धज्ञानः परमेश्वर एव ज गत्कारणं अत एव स्वराट् स्वतः सत्ताप्रदत्वाच्च परमार्थसत्यः सर्वं तेनैव न च निरस्तकुहकं तं धीमहीति गायत्र्यारम्भेण च गायत्र्याख्या ब्रह्मविद्या रूपमेतत्पु राणमिति दर्शितं यथोक्तं मत्स्यपुराणे पुराणदान

भा०म०
२

प्रस्तावेयत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरः वृत्रासुरवधोपेतंतद्भागवतमिष्यते १ लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं प्रौष्ठपद्यांपौर्णमास्यांसयातिपर मंपदं २ अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितं पुराणांतरेचग्रंथोष्टादशसाहस्रोद्वादशस्कंधसम्मितः हयग्रीवब्रह्मविद्यायत्रवृत्रवधस्तथा १ गायत्र्या

तेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषाधाम्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि १

श्रीकृष्णः १ श्रीकृष्ण०

चसमारंभस्तद्वैभागवतंविदुः अग्निपुराणे अंबरीषंप्रतिगौतमवचनं अंबरीषशुकप्रोक्तंनित्यंभागवतंशृणु पठस्वस्वमुखेनापियदीच्छसिभवक्षयमिति अतएव भागवतंनामान्यदित्यपिनशंकनीयं १

स

राम०
२

द्रिमत्सगुणं

भाग वततात्पर्य स्कंध १ अ० १ प्रायः सत्सु मात्सर्याभावस्तथापि अर्जुनेन सताप्यसूयेत वृत्तमनस्तत्र प्रार्थये यतः सूयसा न हानि फलं कृत्वा तु इति निर्मत्सराणामित्युक्तं ॥ निरस्ता स्विउ दोषं यदा न हेतु भवात्मकं ॥ सर्व द्वापर मे प्रश्न तस्माद्वासनमीर्ष्ये सतां नीत्यस हिता यः ॥ न तत्त्वनिस्समप्रतिहतं ॥ स्कांदे च ॥ वसना दासना दुत्त्व निरूपाधिविहतं यतः ॥ वासनेन इयतस्कन्नमे तस्मत्तुल्यमशाध्यतनुति ॥ वसनाद्वेना यानि हतत्त्व वसनाद्गुणि निस्सत्व ॥ स्थिरसर्थको वसधातुः ॥ अधिकार्यनधिकार्यभिप्रायेण सद्यः स्तत्क्षणपद्योनविरोधः ॥ २ ॥

लं

इदानीं श्रीभव्रवर्णनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति धर्म इति अत्र श्रीमति सुंदरे भागवते परमो धर्मो निरूप्यते परमत्वे हेतुः प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इत्यर्थः अधिकारितोपि धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरस्तद्रहितानां सतां भूतानुकंपिनामेवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं (ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमुक्तं) ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमाह वेद्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादिवत् द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवः वस्तुनः शक्तिर्माया

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् २ २ श्रीकृष्णः

वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यमयत्नेनैव ज्ञातुं शक्यमित्यर्थः ततः किमत आह शिवदं परमसुखदं किंच आध्यात्मिकादितापत्रयोन्मूलनं च अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं उक्तं ॥ महामुनिः श्रीनारायणस्तेन प्रथमं संक्षेपतः कृते देवताकांडगतं श्रैष्ठ्यमाह परैः शास्त्रैस्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुध्यते स्थिरीक्रियते वाशब्दः कटाक्षे किंतु विलंबेन कथंचिदेव अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह कृतिभिरिति पुण्यैः शुश्रूषा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः तस्मात्कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः

कृतेनापि श्रैष्ठ्यमाह ॥

भागवततात्पर्यं॥ गलितमित्यनेनान्यान्यपि भारतादीनि भारतादीनि फलानि गलितानि इति॥ तन्मध्ये रसरूपमिति लौकिकफलं चेतनत्वमुक्तमिति॥

भा०पु०
३

श्रेयं श्रुतौ नित्यमेतदेव श्रोतव्यमिति भावः २ इदानीं तु न केवलं शास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपि तु सर्वशास्त्रफलरूपमिदं अतः परमादरेणास्वाद्यमित्याह निगमेति निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम तत्तु वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुकस्य मुखे निहितं च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैः अखंडमेवावतीर्णं न तु उच्चनिपातेन स्फुटितमित्यर्थः एतच्च भविष्यदपि भूतवन्निर्दिष्टं अनागतज्ञानेनैवास्य शास्त्रस्य प्रवृत्तेः अत एवाम्रत्वरूपेणोत्प्रेक्षितं लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं अत्र

त

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ॥ ० श्रीकृष्णः ०

तु शुको मुनिः अमृतं परमानंदः स एव द्रवो रसः रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः अतः हे रसिकाः हे रसज्ञाः तत्रापि भावुकाः हे रसविशेषभावनाचतुराः अहो भुवि गलितमिति अलभ्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः पिबत ननु त्वगस्थ्यादिकं विहाय फलात् रसः पीयते कथं फलमेव पातव्यं तत्राह रसं रसमयं अतः त्वगस्थ्यादेर्हेयस्याभावात् ॥ ७ ७

राम०
३

॥ अत्रेयं प्रक्रिया ॥ न इस्मात्सुमिन्नदृति सूत्रेण रसादिभ्यश्चेति वचनेन च भेरुपि वक्तायां मतुप् भवति ॥ न च गुणवाचकेभ्यो इत्युक्तेर्भ्यो नहितस्य मतुपो गुणव
चनेभ्यो मतुपो लुगिष्ट इति वचनेन लोपो भवति ॥ एवं प्रकृतेपि रसशब्दस्य फलसामानाधिकरण्येन गुणवचनत्वो भावनास्माद्विहितस्य मतुपः पूर्ववचनेन
लोपस्याप्राप्तस्यास्य अवणेऽप्यपेक्षितेऽपि तादात्म्यविवक्षायाः सत्वात् मतुपूनप्राप्तोतिइति ॥ ५ ॥

फलमेव रसं पिबत अत्र च रसतादात्म्यविवक्षया रसवत्वस्याविवक्षितत्वाद्गुणवचनेभ्यः रसशब्दे मतुपः प्राप्तस्य लोपेन विनैव रसं फलमिति सामानाधिक
रण्यं अत्र फलमित्युक्ते यानासंभवो हेयांशप्रशांतिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं रसमित्युक्ते पिबतेति त्वरसस्य पानमशक्यत्वात् फलमित्युक्तमि
ति रसश्च्यं न च भागवतामृतपानं मोक्षेपि त्याज्यमित्याह आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य न ही दं स्वर्गादिसुखवत्मुक्तो त्यज्यते किं
तु सेव्यत एव वक्ष्यति हि आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति तदेवमनेन श्लोकत्रयेण विशिष्टेष्ट

पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३ ओं नैमिषेऽनिमिषक्षेत्रे ऋ
षयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ४ ४ श्रीरूपः ॥ ७

वताः अनुस्मारण्याः पूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादि वैशिष्ट्यं तु पूर्वसिद्धत्वेन वक्ष्यो हनभिमुखी कृत्य शास्त्रमारभते ३ नैमिष इति ऋ
षयः विसृष्टस्य मनोमयस्य नेमिः सीर्यते कुंठी भवति यत्र तन्नैमिशं नैमिशमेव नैमिशं तथा च वायवीये एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते यत्रा
स्य शीर्यते नेमिः स देशस्तपसः शुभ इत्युक्त्वा सूर्य्यसंकाशं चक्रं सृष्टा मनोमयं प्रणिपत्य महादेवं विससर्ज पितामहः ते पि हृष्टं ....
.... तत्र विप्राः महाप्यजग तीमभ्रमयपतस्य चक्रस्य यत्र नेमिर्व्यशीर्यत तद्वनं तेन विख्यातं नैमिशं मुनिपूजितमिति नैमिषमिति पाठे तु

नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेरविसुने: ।।

भा॰ प्र॰
४

एवंकृष्णात्तीतेर्दिवौमुनिर्गीरसुखंतदा उवाचनिमिषेणेदंनिद्रांराजनवबलं अरण्येऽस्मिन्ततस्तितंनैमिषारण्यसंज्ञितम् भविष्यतियथार्थंवैब्राह्मणानां
विशेषकमिति अनिमिषः श्रीविष्णुः अनुग्रहदर्शित्वात् तस्यक्षेत्रे तथाचोक्तंवराहे नकारादिषुचनम् क्षेत्रेऽस्मिन्वैसर्वंवयमितिस्कन्दे मार्गेणापिजड्डतिस्वर्गो
योहरिः सर्ववाक्त्रोभक्तानांनिवासस्थानंतस्मैतस्मैतत्प्राप्तये इत्यर्थः सहस्रंसमाः संवत्सराः अनुष्ठानकालोयस्यतत्सत्रंसत्रसंज्ञकं कर्मोद्दिश्यसत्रा

तस्यकदाचिन्मुनयः प्रातर्हुतहुताग्नयः सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ५
श्रीराम॰ ५ श्रीकृष्ण॰

सत्तउपविविशुः यद्वाआसतअकुर्वतेत्यर्थः आलभतनिर्वर्तयति उपपंतादिवत् प्रत्ययोच्चारणमात्रार्थत्वेनआसतधात्वर्थस्याविवक्षितत्वात् ४ प्रातः
कालेहुताः एवहुताअग्नयोयैस्ते अनेनतन्निमित्तनैमित्तिकहोमसाकल्यंदर्शितम् इदंवक्ष्यमाणंआदरात्पप्रच्छुः ५ छ छ छ छ छ छ

राम॰
४

धात्वर्थोगिप्रकृत्यर्थइतिवैयाकरणाःवदंति ।। मीमांसकास्तुप्रत्ययार्थोधात्वर्थइतिवदंति ।। अत्रतुमीमांसकमतेनआसतेत्यत्र
असधात्वर्थस्यांतुरूपप्रत्ययोच्चारणस्यैवतदर्थत्वात् अविवक्षितत्वं ।। वैयाकरणमतेनाप्यविवक्षितएवधात्वर्थइति ।।
डुलभषप्राप्तौइतिसूत्रादालभतेसत्त्यास्यर्थत्वेनमीमांसकमतेदेवतोद्देश्यकपश्चात्‌नरूपालंभनधात्वर्थोविवक्षितत्वं ।।
वेपर्वाजवंतुसतानवैयाकरणाः मीमांसकमतेतुनिर्वापः पुरोडाशसिद्धिः ।। एवमेवसर्वत्रोतियज्ञं ।। उपयंतीत्यत्रइयंग्नेो

विविदिषितानर्थान्पृच्छन्तस्तस्य सर्वशास्त्रज्ञानातिशयमाह त्वयेति त्रिभिः श्लोकैः इतिहासो भारतादिः तत्सहितानि न केवलमधीतानि अपितु आख्याता
न्यपि व्याख्यातानि च उत अपि यानि धर्मशास्त्राणि तान्यपि किंच यानीत्यादि विदां विदुषां मध्ये श्रेष्ठो व्यासो यानि वेद यदा च ते सगुणनिर्गुणब्रह्मणी विंदंतीति त
था ७ वेत्थ जानासि सौम्य हे साधो तेषामनुग्रहात् तत्त्वतो ज्ञाने हेतुमाह ब्रूयुरिति स्निग्धस्य प्रेमवतः उत एव रहस्यमपि ब्रूयुरेव ८ अंजसा यथावदेव नः एकांत
तः श्रेयः अव्यभिचारि श्रेयःसाधनं ९ अन्येऽपि बहुनाकाले न बहुशास्त्रश्रवणादिभिर्विनिश्चिन्वंतु नेत्याह प्रायेणेति हे सभ्य साधो अस्मिन्युगे कलौ अल्पा ५५

ऋषय ऊचुः त्वया खलु पुराणानि सेतिहासानि चानघ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ६ यानि
वेदविदां श्रेष्ठो भगवान्बादरायणः अन्ये च मुनयः सूत परावरविदो विदुः ७ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनु
ग्रहात् ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८ तत्र तत्रांजसायुष्मन्भवता यद्विनिश्चितं पुंसामेकान्ततः श्रे
यस्तन्नः शंसितुमर्हसि ९ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः मंदाः सुमंदमतयो मन्दभाग्या ह्युपद्रुताः
१० भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ब्रूहि नः श्रद्दधानानां ये
नात्मा सुप्रसीदति ११

युषो जनाः तत्रापि मंदाः अलसाः तत्रापि सुमंदमतयः तत्रापि मंदभाग्या विघ्नाकुलाः तत्रापि उपद्रुता रोगादिभिः १० न च बहुशास्त्रश्रवणेऽपि तावतैव फलसि
द्धिरित्याह भूरीणीति कर्माणि यज्ञादीनि यानि समुद्धृत्य पृथक्कृत्य येन उद्धृतवचनेन नः आत्मा बुद्धिः सुप्रसीदति सम्यक् प्रशाम्यति ११ अस्मात्तरं तज्जानासीति

येषु तानि
भग महानस्माभ्यं मुनिस्ततद्यानस्पस्यात्नैनपुतं॥ ब्रह्मांडे॥ द्वैपायनेन यद्बुद्धं ब्रह्माद्यैस्तन्न बुध्यते॥ सर्वकुद्वं सर्वैर्वेद ...
नान्यगोचरं ॥१॥

पंचभिः भद्रं त इत्यौत्सुक्येनाशीर्वादः भगवान्निरतिशयैश्वर्यादिगुणः सात्वतां सच्छब्देन सत्त्वमूर्तिर्भगवान् सत्तूप्राप्यते तया विद्यते येषां रतिः सत्त्वं ते भक्ताः
स्वार्थेऽण् राक्षसवायसादिवत् तस्य चात्ववर्णमार्षं तेदेवं सात्वंत इति भवंति तेषां पतिः यादवः यस्यार्थविशेषस्य चिकीर्षया वसुदेवात् वसुदेवस्य भार्यायां

सूत जानासि भद्रं ते भगवान्सात्वतांपतिः देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया १२ तन्नः शुश्रूष
माणानामर्हस्यंगानुवर्णितुम् यस्यावतारो भूतानां क्षेमाय च भवाय च १३ श्रीकृष्ण० ॥ १३

देवक्यां जातः १२ अंग हे सूत तन्नो वर्णयितुमर्हसि सामान्यतस्तावद्यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये १३ १३ १३

परवशस्यहरिनामग्रहणानुपपत्तेरतआह ॥ मानसिकवदभ्यासात् ॥ मनसाहरिनामग्रहणान्मुक्तिरित्यर्थः ॥ ब्रह्मवैवर्ते ॥
शारीराद्वाचिकाभ्यासाद्वाचिकान्मानसाभवेत् ॥ मानसान्निर्वशोमुच्यन्नान्यथामुक्तिरिष्यतइति ॥

तत्प्रभावमनुवर्णयंतस्तद्यशःश्रवणोत्सुकतामाविष्कुर्वंति आपन्नइतित्रिभिः संसृतिमापन्नःप्राप्तःविवशोपिततःसंसृतेः अत्रहेतुःयद्यतोनाम्नःभयमपिस्वयंबिभे
ति १४ किंचयस्यपादौसंश्रयोयेषांतएवप्रशमोऽयनंवर्त्मआश्रयोवायेषांतेमुनयः उपस्पृष्टाःसन्निधिमात्रेणाश्रिताःसद्यःपुनंति स्वर्धुनीगंगातस्याआपस्तुअ
त्यादराद्विसृष्टाः ननुतत्रैवतिष्ठंति अतस्तासांबंधेनपुनंत्यापिअनुसेवयापुनंतिनतुसद्यइतिमुनीनामुत्कर्षोक्तिः १५ पुण्यश्लोकैरीड्यानिस्तुत्यानिकर्माणियस्य
यस्तस्ययशःकलिमलापहंसंसारदुःखोपशमनं १६ अस्मांतरंतस्येति उदाराणिमहांतिविश्वसृष्ट्यादीनि सूरिभिर्नारदादिभिः कलाब्रह्मरुद्रादिमूर्तीः १७ अ

आपन्नसंसृतिंघोरांयन्नामविवशोगृणान् ततःसद्योविमुच्येतयद्बिभेतिस्वयंभयं १४ यत्पादसंश्रयाःसूतमुनमुनयः
प्रशमायनाःसद्यःपुनंत्युपस्पृष्टाःस्वर्धुन्यापोनुसेवया १५ कोवाभगवतस्तस्यपुण्यश्लोकेड्यकर्मणः शुद्धिकामो
नशृणुयाद्यशःकलिमलापहं १६ तस्यकर्माण्युदाराणिपरिगीतानिसूरिभिः ब्रूहिनःश्रद्दधानानांलीलयादध
तःकलाः १७ अथाख्याहिहरेर्धीमन्नवतारकथाःशुभाः लीलाविदधतःस्वैरमीश्वरस्यात्ममायया १८

थेतिप्रश्नांतरे अवतारकथाःस्थित्यर्थमेव तानदर्शयिष्यमस्याद्यवताराः यदीयाःकथाः स्वैरंलीलाःकुर्वतः १८ ननुकस्मादवतारप्रयोजनेनैवतच्चरितंप्रष्टव्यं
पिज्ञातएवअन्योस्तुकथं नपुनरपितच्चरितान्यवश्योतुमिच्छंतस्तत्राप्यनतत्प्रभावमावेदयंति एवंपंतितियोगमायादिषुतन्नाः स्पष्टइच्छंतितमीपस्मात्तउत्तमश्लो
याभृतः श्लोकोपशोयस्मात्तस्यविक्रमेनुविशेषेणानतृप्यामः अलमितिनमन्यामहे तत्रहेतुःपदेपदेक्रमशःशृण्वतांयद्वाअन्येतृप्यंतुनामवयंतुनेतितुशब्दस्यान्वयः
अयमर्थः त्रिधाह्यलंबुद्धिर्भवतिउदरादिभरणेनवारसाज्ञानेनवास्वादविशेषाभावाद्वातत्रश्रवणात्मिन्नेनेनश्रोत्रस्याकाशत्वात्भरणासिन्तुकंरसज्ञानमित्य

मायास्वरूपेण ॥ विष्णुसंहितायां ॥ इच्छाज्ञानक्रियाशक्तिर्त्रिनशक्तिरितित्रिधाशक्तिशक्तिमतोभ्यापिनभेदइष्यतइति

इक्षुभक्षणे मधुर[illegible]रसस्येव सततेन आम्लादिरसांतराभावाद्यथा तृप्तिर्भवति तथा अत्र नेति व्यधिकरण दृष्टांतोयं ॥ रसांतरस्यात्र सत्त्वादिति ॥

भा॰प्र॰
६

नेन चाज्ञानतः पशुवत् तृप्तिर्निराकृता इक्षुभक्षणावद्रसांतराभावेन तृप्तिं निराकरोति पदे पदे प्रतिक्षणं स्वादुतोपि स्वादु १९ अतः रामचरित्राणि कथयेत्याशयेनाहुः कृतवानिति अतिमर्त्यानि मर्त्यानतिक्रांतानि गोवर्द्धनोद्धरणादीनि मनुष्येष्वसंभावितानीत्यर्थः २० ननु याजनाध्यापनादिलग्नानां कुतएव श्रवणा

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ कृतवान्किल कर्माणि सह रामेण केशवः अतिमर्त्यानि भगवान्गूढः कपटमानुषः २० कलिमागतमाज्ञाय क्षेत्रेस्मिन्वैष्णवे वयम् आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २१

वकाशः स्यादत आहुः कलिमिति आगतं ज्ञात्वा तद्भिया विष्णुपदं गंतुकामाः दीर्घसत्रेण निमित्तेन आसीनाः हरेः कथायां सक्षणाः लब्धावसराः २१ २१ २१

राम॰
६

अनुपेतमिति ॥ उपनयनाभावार्थकत्वेनानुपेतस्य प्रव्रजनायोग्यादिति ध्येयं ॥ अतः अनुपेतमित्यस्योपेतेन भवतीत्यर्थमंगीकृत्य देहादिभिरिति शेषपूरणे तु अनुपेतत्वं प्रव्रजनोपयोगीति भावः ॥ देहादिष्वभिमानरहितमित्यर्थः ॥ ननु कृतकृत्य इत्यस्य स्वाधर्म्यत्वं तत आह ॥ अनभिमानादिति मलं ॥ इत्थं च देहादिषु अभिमानराहित्यमित्यर्थः ॥

खल्विं अस्समये त्वद्दर्शनमीश्वरेणैव संपादितमित्यभिनंदति त्वमिति कलिं निस्तर्तुमिच्छतां श्रुण्वतां तितीर्षतां कर्णधारो नाविक इव २१ पुनः प्रश्नांतरमाह ब्रूहीति धर्मवर्मणि कवचवद्रक्षके स्वां काष्ठां स्वमर्यादां स्वरूपमित्यर्थः अतस्तदनंतरं कं संस्थानमुपगते धर्मस्तानादिभिः सहेति प्रश्नः २२ इति प्रथमे प्रथमः १ तदेवं प्रथमेऽध्याये षट् प्रश्नाः मुनिभिः कृताः द्वितीये तु सूतस्तदनुवर्णयामाहेत्यथ १ विप्राणामिति एवंभूतैः सम्यक्प्रश्नैः सम्यक् हृष्टः रोमहर्षणस्य पुत्र उग्रश्रवाः तेषां

त्वन्नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षताम् कलिं सत्वहरं पुंसां कर्णधार इवार्णवं २२ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः २३ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कंधे नैमिषीयोपाख्याने प्रथमोऽध्यायः १ व्यास उवाच इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १ सूत उवाच यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥

श्रीकृष्णः ॥ श्रीकृष्णः

वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे उपक्रांतवान् १ प्रवचनस्योपक्रमे गुरुदेवतानमस्कारः कर्तव्य इति तमाह त्रिभिः यमिति तत्र श्रीगुरोः शुकस्यैश्वर्यं तच्चरितेनैव द्योतयन्नाह यं प्रव्रजंतं संन्यासाय गच्छंतं अनुपेतमनुपनयनं यज्ञोपवीतमनुपपन्नं यद्वा केनाप्यनुपेतं अननुगतमेकाकिनमित्यर्थः तत्र हेतुः अपेतकृत्यं कृत्यशून्यं कर्ममार्गे अप्रवर्तमानं नैष्ठिकत्वात् द्वैपायनो व्यासः विरहात्कातरो भीतः सन् हे पुत्र इति आहूतवान् हरा राद्ध

अकातरहति पुरं ॥ कातरवद्देवहर्शयन्नरति ॥ स्कांदे ॥ निस्तत्तः परानंदो बोध्यव्ययः परमेश्वरः स पुत्रार्थं तपस्तेपे व्यासो रुद्रस्य चेश्वरः ॥ ३ ॥ कातर्यं दर्शयामास मियोगलोकिकं हरिः ॥ कुतः कातरतालस्य निस्तानंदमहोदधेरिति ॥ २ ॥ इत्थं च व्यासं ब्रह्मत्वेनाजानतां कातर्यं दृश्यते तज्ज्ञानं तु न तथेति ॥

भा०प्र०
७

नैसर्गिकसंबंधिरार्थः तदा तन्मयतया शुककर्तृकया तरवोऽभिनेदुः प्रत्युत्तरमुक्तवंतः पितुः स्नेहानुबंधपरिहाराय योगबलेन तरवो द्वारेणोक्तवानित्यर्थः तं मुनिमानतो
ऽस्मि तन्मयत्वोपपादनाय विशेषणं सर्वभूतानां हृन्मनः अयं योगबलेन प्रविशतीति सर्वभूतहृदयस्तं २ तत्कृपालुत्वं दर्शयन्नाह य इति अंधं गाढं तमः

पुत्रेतितन्मयतयातरवोभिनेदुस्तंसर्वभूतहृदयंमुनिमानतोस्मि २ यःस्वानुभावमखिलश्रुतिसारमेकम
ध्यात्मदीपमतितीर्षतांतमोंधं संसारिणांकरुणयाहपुराणगुह्यंतंव्याससूनुमुपयामिगुरुंमुनीनां ३
श्रीकृष्णः १ श्रीकृष्णः

संसारपरस्वमतितर्तुमिच्छतां पुराणानां मध्ये गुह्यं गोप्यं तत्र हेतुत्वेन चत्वारि विशेषणानि स्वः निजः असाधारण अनुभावः प्रभावो यस्य तत्स्वानुभावं अ
खिलश्रुतीनां सारं एकमद्वितीयमनुपममित्यर्थः आत्मानं कार्यकारणसंघातमधिकृत्य वर्तमानमात्मन त्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकं उपयामि
शरणं प्रजामि ३

राम०
७

एवंद्वाभ्यांगुरुंनमस्कृत्यदेवंप्रणामतिजयत्यनेनसंसारमितिजयोग्रंथः तंउदीरयेदितिस्वयंतथोदीरयन्नन्यानपिपौराणिकाननुशास्ति ४ तेषांवचःप्रतिपूज्येतिपदु क्तंतत्कृतिसज्जनंकरोतितिहेमुनयःसाधुयथाभवतितथाहंपृष्टः यतोलोकानांमंगलमेतत् यत्यतःकृष्णविषयःसंप्रश्नःकृतःसर्वशास्त्रार्थसारोद्धारप्रश्नस्यापिकृ ष्णपर्यवसानादेवमुक्तं ५ तत्रयत्प्रथमंपृष्टंसर्वशास्त्रसारमैकांतिकंश्रेयोब्रूहीतितत्रोत्तरं सवैपुंसामिति अयमर्थः धर्मोद्विविधःप्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च तत्रयःस्वर्गाद्यर्थःप्रवृत्तिलक्षणःसोपरःयतुयस्माद्धर्मात्श्रवणादिलक्षणाभक्तिर्भवतिसपरोधर्मःसएवैकांतिकंश्रेयइतिकथंभूताअहैतुकीहेतुःफला

नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींव्यासंततोजयमुदीरयेत् ४ सूतउवाच मुनयःसाधुपृष्टोहंभ वद्भिर्लोकमङ्गलम् यत्कृतःकृष्णसम्प्रश्नोयेनात्मासुप्रसीदति ५ सवैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे अहैतु क्यप्रतिहतायपात्मासुप्रसीदति ६ वासुदेवेभगवतिभक्तियोगःप्रयोजितः जनयत्याशुवैराग्यंज्ञानञ्चयदहैतु कम् ७ श्रीरामः

नुसंधानरहिताअप्रतिहताविघ्नैरनभिभूता ६ ननुतमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंति यज्ञेनदानेनतपसानाशकेनेत्यादिश्रुतिभ्योधर्मस्यज्ञा नांगत्वप्रसिद्धेःकथंततोभक्तिहेतुत्वमुच्यते सत्यंतत्तुभक्तिद्वारेणेत्याहवासुदेवइति अहैतुकंशुष्कतर्काद्यगोचरंऔपनिषदमित्यर्थः ७ व्यतिरेकमाह धर्मइतियो धर्मइतिप्रसिद्धःसयदिविष्वक्सेनस्यकथासुरतिंनोत्पादयेत् तर्हिस्वनुष्ठितोपिसन् श्रमएवतयःननुमोक्षार्थस्यापिधर्मस्यश्रमत्वमस्त्येव अतआह के

भा॰प्र॰
८

वलंनिष्फलश्रमइत्यर्थः नन्वस्तितत्रापिस्वर्गादिफलमित्याशंक्यैवकारेणनिराकरोतिक्षयिष्णुत्वात्तन्नतत्फलमित्यर्थः नन्वक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवतीत्यादिश्रुतेर्नतत्फलस्यक्षयिष्णुत्वमित्याशंक्यहिशब्देनसाधयति तद्यथेहकर्मजितोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयत इतितर्कानुगृहीतयाश्रुत्याक्षयिष्णुत्वप्रतिपादनात् तदेवंहरिभक्तिद्वारातद्वितरैवैराग्यात्मज्ञानपर्यंतःयोधर्मइत्युक्तम् ८ अन्येतुमन्यंतेधर्मस्यार्थः

धर्मस्त्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः नोत्पादयेद्यदिरतिंश्रमएवहिकेवलम् ८ धर्मस्यह्या
र्ग्य पवर्ग्यस्यनार्थोर्थायोपकल्पते नार्थस्यधर्मैकांतस्यकामोलाभायहिस्मृतः ९ ९
श्रीरामः ॥ श्रीरामः॰

फलंतस्यचकामःफलंतस्यचेंद्रियप्रीतिःतत्प्रीतेश्चपुनरपिधर्मादिपरंपरेतिप्राहुः धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यतइत्यादिनिराकरोति ध र्मस्येतिद्वाभ्यांआपवर्ग्यस्यउक्तन्यायेनापवर्गपर्यंतस्य अर्थायफलत्वायअर्थोनोपकल्पतेयोग्योनभवतितथाअर्थस्यापिएवंभूतधर्माव्यभिचारिणः कामोलाभायफलत्वायनहिस्मृतोमुनिभिः ९

राम॰
८

कामस्यविषयभोगस्यचेंद्रियप्रीतिर्लाभः फलंनभवति किंतुयावता जीवेततावानेवकामस्यलाभः जीवनपर्याप्तएवकामः सेव्यइत्यर्थः जीवस्यजीवनस्यपुनः कर्मा॰
नुष्ठानद्वाराकर्मभिर्यइहप्रसिद्धः स्वर्गादिः सोर्थोनभवतिकिंतुतत्वजिज्ञासैवेति १० ननुचतत्वजिज्ञासानामधर्मजिज्ञासैवधर्मएवहितत्वमितिकेचित् तत्राह तत्व
विदस्तुतदेवतत्वंवदंति किंतद्यज्ज्ञानंनामाद्वयमितिक्षणिकविज्ञानपक्षंव्यावर्तयति ननुतत्वविदोपिविगीतवचनाएवमेवं तस्यैवतत्वस्यनामांतरैरभि
धानादित्याह औपनिषदैर्ब्रह्मेतिहैरण्यगर्भैः परमात्मेतिसात्वतैर्भगवानित्यभिधीयते ११ तच्चतत्वंसपरिकरयाभक्त्यैवप्राप्यतइत्याह तदितिश्रद्दधानाः ज्ञानवैराग्ययु

कामस्यनेंद्रियप्रीतिर्लाभोजीवेतयावता जीवस्यतत्वजिज्ञासानार्थोयश्चेहकर्मभिः १० वदंतितत्तत्वविदस्तत्वंयज्ज्ञा
नमद्वयम् ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते ११ तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया पश्यंत्यात्मनिचात्मा
नंभक्त्याश्रुतगृहीतया १२ अतः पुंभिर्द्विजश्रेष्ठावर्णाश्रमविभागशः स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणम् १३
तस्मादेकेनमनसाभगवान्सात्वतांपतिः श्रोतव्यः कीर्तितव्यश्चध्येयः पूज्यश्चनित्यदा १४ यदनुध्यासिनायुक्ताः
कर्मग्रंथिनिबंधनम् छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिम् १५ १५ १५ १५ १५ १५

क्तयेत्ययुक्तयेत्यत्रज्ञानेपरोक्षं तच्चतत्वंआत्मनिक्षेत्रज्ञेपश्यंति किंतदात्मानंपरमात्मानंश्रुतेनवेदांतादिश्रवणेनगृहीतयाप्राप्तयेति भक्तेर्दोषमुक्तं १२ धर्मस्य
फलंभक्तिर्नार्थकामादिकमितीममर्थमुपपाद्योपसंहरति अतइति हेद्विजश्रेष्ठाः हरितोषणंहरेराराधनंसंसिद्धिः फलं १३ यस्माच्चभक्तिविहीनोधर्मः केवलंश्र
मएवतस्माद्भक्तिप्रधानएवधर्मोनुष्ठेयइत्याह तस्मादिति एकेनएकाग्रेणमनसा १४ भक्तिरहितोधर्मः केवलश्रमएवेतिप्रपंचितमिदानींतुभक्तेर्मुक्तिफलत्वं
दर्शयति यदिति यस्यानुध्यानमनुध्यानंसेवासिः खड्गस्तेनयुक्ताविवेकिनः ग्रंथिमहंकारंनिबध्नातियत्कर्मतत्तच्छिंदंति तस्यकथायांरतिंकोनकुर्यात् १५

ननुयस्यैवंकर्मनिर्मूलनीहरिकथारतिस्तस्यापितत्स्यांतुविनोत्पद्यतेनकिंकर्मतत्राहशुश्रूषोरिति पुण्यतीर्थनिषेवणाभिर्निष्पापस्यमहत्सेवास्यात्तत
यावत्तद्धर्मश्रद्धाततःश्रवणेच्छाततोरुचिःस्यादित्यर्थः १६ ततश्चशृण्वतामिति पुण्येपुण्येश्रवणकीर्तनेयस्यसःसतांसुहृद्धृदिस्थःकर्णा हृदिस्थान्यभद्रा

शुश्रूषोःश्रद्दधानस्यवासुदेवकथारुचिःस्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवणात् १६ शृण्वतांस्व
कथाःकृष्णःपुण्यश्रवणकीर्तनःहृद्यंतःस्थोह्यभद्राणिविधुनोतिसुहृत्सताम् १७ नष्टप्रायेष्वभद्रेषुनि
त्यंभागवतसेवया भगवत्युत्तमश्लोकेभक्तिर्भवतिनैष्ठिकी १८

णिकारी हृदिस्थान्यभद्राणिकामादिवासनास्तानिधुनोति हृद्गतस्यैवंहृदिस्थःसन् १७ ततश्चनष्टप्रायेष्वितिसर्वाभद्रनाशनस्यज्ञानोत्तरकालत्वात्प्रायग्रह
णं भागवतानांभागवतशास्त्रस्यवासेवया नैष्ठिकीनिश्चलाविक्षेपकाभावात् १८ १८ १८ १८ १८ १८ १८ १८

रजस्तमसी ये च तत्प्रभवा भावाः कामादयः एतैरनाभिभूतं प्रसीदति उपशाम्यति १९ भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसंगस्य २० ज्ञानफलमाह भिद्यत इ
ति हृदयमेव ग्रंथिश्चिज्जडग्रंथनरूपोहंकारः अतएव सर्वे संशयाः असंभावनादिरूपाः कर्माण्यनारब्धफलानि आत्मनि स्वरूपभूते ईश्वरे दृष्टे एवकारेण ज्ञानानंत
रमेवेति दर्शयति २१ अतस्सदाचारं दर्शयन्नुपसंहरति अत इति आत्मनः प्रसाधिनीं मनःशोधिनीं वासुदेवभक्तिं कुर्वंतीति भजनीयविशेषो दर्शितः २२ तदेवं

तदा रजस्तमोभावाः काम लोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति १९ एवं प्रसन्नमनसो भगवद्भक्तियो
गतः भगवत्तत्वविज्ञानं मुक्तसंगस्य जायते २० भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि दृष्ट ए
वात्मनीश्वरे २१ अतो वै कवयो नित्यं भक्तिं परमया मुदा वासुदेवे भगवति कुर्वंत्यात्मप्रसादिनीं २२ सत्वं रज
स्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु
सत्वतनोर्नृणां स्युः २३

यद्यपि ब्रह्मादीनां त्रयाणामेकात्मकत्वेपि वासुदेवस्याधिक्यमाह सत्वमिति इह यद्यप्येक एव परः पुमान् वैशिष्ट्येन फलस्य स्थित्यादये परषि स्थितिप्रव
र्याः संज्ञाः केवलं भिन्ना धत्ते हरिविरिंचिहरा इति वक्तव्ये संधिरार्षः तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्वतनोर्वासुदेवादेव स्युः २३ उपाधिस्वभाववैशिष्ट्येन दृष्टा न फलवैशिष्ट्यं
न्तमाह पार्थिवादिति दारुणः प्रवृत्तिप्रकाशरहितात् दारुणः काष्ठात् सकाशात् धूमस्तु उत्कृष्टः प्रवृत्तिस्वभावत्वात् ततोपि त्रयीमयो वेदोक्तकर्मप्रचुरः ईदृक्कर्मप्रवर्तकत्वात् तस्मादग्निस्त्रयीमयः साक्षात्

सत्वादीनांप्रासत्वाविशेषेपिसत्वगुणस्योत्तमत्वमित्यत्र दृष्टांतउच्यते ॥ पार्थिवादितिश्लोकेयथ तथेत्यध्याहार्यं ॥ तत्रधूमाद्दग्ने
रुत्तमत्वे त्रयीमयइतिहेतुः ॥ दारुणोधूमस्योत्तमत्वे हेतुर्नीलः अतत्समात्रः ॥ मेघरूपत्वाद्धूमंडलमहति ॥ धूमस्य मेघद्वारोपकार
त्वेनतस्यचरश्मिहीननत्तोकोपकारादितिभाव ॥ एवंरजोसितमसोपिरजयापरोक्षत्वानसुचोत्तुतारतम्यमितिविशेषः ॥
इतिभागवततात्पर्ये ॥ अ० २

कर्मसाधनत्वात् एवंतमसः सकाशाद्रजो ब्रह्मदर्शने ब्रह्मप्रकाशके तु शब्देन लयात्मकात् तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शन
सत्त्वास्तीतिमात्रमुक्तम् ननु सर्वथा तत्प्रकाशकत्वविशेषयत्वात् यत्सत्त्वं तत्साक्षात्ब्रह्मदर्शनं अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति
भावः २४ वासुदेवभक्तौ पूर्वाचारसम्मतिमाह भेजिर इति अथ अतो हेतोः अग्रे पुरा विशुद्धं सत्त्वमूर्तिं भगवंतमधोक्षजम् अतो येन्यजन अनुव्रतंतेतेइह

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं २४ भेजिरे मुनयोथाग्रे
भगवंतमधोक्षजं सत्वं विशुद्धं क्षेमाय कल्पंते येनु तानिह २५ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ
नारायणकलाः शांताः भजंति ह्यनसूयवः २६ २६ २६ २६ २६ ॥ ७

संसारे क्षेमाय कल्पंते २५ ननु अन्यानपि केचित् भजंतो दृश्यंते मत्यं मुमुक्षवस्तु अन्यान्न भजंति किंतु सकामा एवेत्याह मुमुक्षव इति द्वाभ्याम् भूतपतीनिति पितृ
प्रजेशादीनामुपलक्षणम् अनसूयवो देवतांतराणि निंदकाः संतः २६

अथ पूर्व्यस्यानंतर्यतार्थः किंतु सात्विकतरूपहेत्वर्थकत्वं कुत्सितस्य सात्विकनारायणकलाभजनं न संभवति यतः सत्वस्यैव कयोः
समशीलत्वस्यापेक्षितत्वादिति ॥ इति भागवततात्पर्यं ॥ अ० २

रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समं शीलं येषां ते श्रिया सह ऐश्वर्यं प्रजाश्चेशंतीति ते तथा ॥ २७ ॥ तत्त्वतो मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां वासुदेवः परस्तात्पर्यगोचरो येषां ते ननु वेदा मखपरा दृश्यंत इत्याशंक्य ते पि तदाराधनार्थत्वात्तत्परा एवेत्युक्तं योगाः योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं ॥ २८ ॥ ज्ञानं ज्ञानशास्त्रं ननु च तत्र ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं तपो ज्ञानं धर्मो धर्मशास्त्रं दानव्रतादिविषयं ननु तत्र स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं सोपि तदानंदांशरूपत्वात्तत्पर एवेत्यु

रजस्तमःप्रकृतयस्समशीला भजंति वै पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥ वासुदेवपरा वेदा वासुदेवपरा मखाः
वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥ वासुदेवपरं ज्ञानं वासुदेवपरं तपः वासुदेवपरो धर्मो वासुदेवपरा गतिः
॥ २९ ॥ स एवेदं ससर्जाग्रे भगवानात्ममायया सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥ ३० ॥ श्रीकृष्णः ॥ ॥

क्तं यद्वा वेदा वेदा इत्यनेनैव तन्मूलत्वात्सर्वाण्यपि शास्त्राणि वासुदेवपराणीत्युक्तं तत्र ननु तेषां मखयोगक्रियादीनां नानार्थपरत्वात्तात्तदेकपरत्व मित्याशंक्य मखादीनामपि तत्परत्वमुक्तमिति द्रष्टव्यं ॥ २९ ॥ ननु जगत्सर्गप्रवेशनियमनादिलीलायुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते कथं वासुदेवपरत्वं सर्वस्य तत्राह स एवेति चतुर्भिः सर्वैरेव श्लोकैस्तस्य कर्माण्युदाहरति अहो निश्चयस्यैतरे सदसद्रूपया कार्यकारणात्मिकया गुणमय्या स्वयं तु अगुणः स्वतो निर्गुणोपि सन्नित्यर्थः ॥ ३० ॥ भगवतो जगत्कारणत्वमुक्तं प्रवेशनियमलक्षणां लीलामाह तयेति विलसितेषु उद्भूतेषु गुणेषु आकाशादिषु अंतः ॥

भा०प्र०
११

प्रविष्टः सन् गुणवानिव मन्दधीनामेवं भाति गुणाद्यभिमानवानिव न तु वस्तुतस्तथा। यतो विज्ञानेन चिच्छक्त्या विजृम्भितः स्फूर्जितः ३१ बहुरूपलीला
माह यथेति स्वयोनिषु स्वाभिव्यंजकेषु अवहितो निहितः विश्वात्मा पुमान् परमेश्वरः भूतेषु प्राणिषु अन्तर्यामितयो निनानात्वेन नानात्वमिवे।

तया विलसितेष्वेषु गुणेषु गुणवानिव अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ३१ यथा ह्यवहितो वह्नि
र्दारुष्वेकः स्वयोनिषु नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ३२ असौ गुणमयैर्भावैर्भूतसू
क्ष्मेन्द्रियात्मभिः स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ३३ श्रीकृष्णः ० ७ ॥ ० ७

नवलकिशोरयन्त्रालय ३३

त्यतेक्षेत्रज्ञरूपेण वा ३२ भोगरूपां लीलामाह असाविति असौ हरिः भूतानि सूक्ष्माणीन्द्रियाणि च आत्मा मनः तैः स्वयं निर्मितेषु भूतेषु चतुर्विधेषु भू
तेषु चतुर्विधेषु रतिभोगेत्वातं त्वयोन्यतेन तद्गुणान् नतन्नद्गुरूपान् विषयानिच्छया भुंक्ते भोजयतीति णिजर्थोऽलेपः पालयतीति वा। तदात्मनेपदमार्षं भुजो।

राम०
११

इदानीं जगज्जानादीनि भ्रस्वसोतस्मात् स्वभावयति पालयति एतनु सर्वावतारेषु साधारणं प्रयोजनं विशेषतः लस्यावतारप्रयोजनकं लीलयैव स्यतेसो भावनलोक
कर्मादिदेवादिषु मे लीलावतारास्तेष्वनुरतोऽनुरक्तः ३४ अथेति ३५ एवमिति ३६ अथ मेदिनी ॥२॥ अवतारकथाप्रसंगेनैव नराभिधा पुरुषावतारान्नत्वा नज्ञारि
अवर्णनैः यदुक्तं अथास्यामाति हरेर्द्भुतमन्यवतारकथाः शुभाः इति तदुक्तरत्वेनावतारान् अभिधित्सन् प्रथमं पुरुषावतारमाह जगृहे इति पंचभिः महदादिभिर्महदहंकार
पंचतन्मात्रैः एकादशेंद्रियाणि पंचमहाभूतानि इति षोडशकलात्मकं शरीरमस्मिन्नतत् ननु पद्यपि भगवद्विग्रहो नैवभूतलक्षणापि विराट्जीवानां यो मिंगोभगवतो वि

भावयत्येष सत्वेन लोकान्वै लोकभावनः लीलावतारानुरतो देवतिर्यङ्नरादिषु ३४ अथ कालाग्निरुद्रात्मा भूत्वा ॥
तीव विभीषणः उपसंहरते विश्वं भगवाननुषोत्तमः ३५ एवमेव स विश्वात्मा विश्वरूपधरो हरिः क्रीडत्यात्मेच्छया वि ॥
मात्मत्य संकल्प ईश्वरः ३६ इति श्रीमहापुराणे प्रथमस्कन्धे नैमिषीयोपाख्याने भगवदनुभावानुवर्णनं द्वितीयोऽध्या
यः २ सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षया १ यस्यां
भसि शयानस्य योगनिद्रां वितन्वतः नाभीहृदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २ यस्यावयवसंस्थानैः कल्पितो

रारूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यं १ कोसौ भगवानित्यपेक्षायां तं विशिनष्टि यस्यांभसीत्यकार्णवेशयानस्य विश्रांतस्य तत्र च योगसमाधिस्तद्रूपां नि
द्रां विस्तारयतः नाभिरेव ह्रदस्तस्मिन्यदांबुजं तस्मात्प्रकाशाद्ब्रह्मा आसीत् अभूत् यो मे कल्पिये पौरुषं रूपं जगृहे २ कीदृशं रूपं तदाह यस्येति ननु कीदृशो विग्रहस्त
स्य योंभसि शेते तमाह ततस्य भगवतो रूपं तु विशुद्धं रजआद्यसंभिन्नं सत्वोर्जितं निरतिशयं सत्वं ३ एतत् रूपो मिनां नानावताराणां निधानमित्याह पश्यंतीति अदभ्रमनल्पं

भा॰टी॰

पश्यंत्यदोरूपमदभ्रचक्षुषा

भा०प्र०
१२

नात्मकंयच्चक्षुस्तेनसहस्रमपरिमितानिपानिपादादीनितैरद्भुतंसहस्रंमूर्धास्योयस्मिनतत् सहस्रंयानिमौल्यादीनितैरुल्लसत्शोभमानं ४ एत
गुरूरस्यैनत्वेनाविर्भावदाविर्भावनिर्भावनिरोभाववदित्याह एवदित्याह एवदिति एततन्नादिनारायणात्वयंनिधीयंतेऽस्मिन्निति निधानंकार्योवस्था

मूर्जितं।।

गृहेभगवतोरूपंविशुद्धंसत्वमूर्ः नाभीह्रदांबुजादासीद्ब्रह्मा विसहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्द्ध
श्रवणाक्षिनासिकंसहस्रमौल्यंबरकुंडलोल्लसत् ४ एतन्नानावताराणांनिधानंबीजमव्ययंयस्यां
शांशेनसृज्यंतेदेवतिर्यङ्नरादयः ५

वना

नेपवेशस्थानंमित्यर्थः बीजंउद्गमस्थानंबीजत्वेपिनात्पबीजतुल्यंकिंत्वव्ययंनकेवलमवताराणामेववीजंकिंतुसर्वप्राणिनामपीत्याह यस्यांशोब्रह्मा
नस्यांशोमरीच्यादिस्तेन ५

राम०
१२

सनत्कुमारावतारंतच्चरितंचाह सएवेतिकौमारस्यार्षःप्राजापत्योमानवइत्यादीनिसर्गविशेषनामानि यः पौरुषंरूपंजगृहेसएवदेवःकौमारंसर्गमाश्रितः
सन्ब्रह्मब्राह्मणोभूत्वाब्रह्मचर्यंचचार ६ प्रथमद्वितीयादिशब्दोत्रनिर्देशमात्रापेक्षया अस्यविश्वस्यभवायउद्भवायमहीमुद्धरिष्यन्नितिकर्मोक्तिरेवंसर्वत्रगवता
रसत्वन्कर्मवाक्यमित्यनुसंधेयं ७ नारदावतारमाहतृतीयमिति ऋषिसर्गमुपेत्यतत्रचदेवर्षित्वमुपेत्येत्यर्थः सात्वतंवैष्णवंतंत्रंपंचरात्रागममाचष्टउक्तवान् य

सदेवप्रथमंदेवःकौमारंसर्गमाश्रितः चचारदुश्चरंब्रह्माब्रह्मचर्यमखंडितम् ६ द्वितीयंतुभवायास्यरसातलगतांमहीम् उ
द्धरिष्यन्नुपादत्तयज्ञेशःशौकरंवपुः ७ तृतीयमृषिसर्गंवैदेवर्षित्वमुपेत्यसः तंत्रंसात्वतमाचष्टनैष्कर्म्यंकर्मणांयतः
८ तुर्येधर्मकलासर्गेनरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरंतपः ९ पंचमःकपिलोनामसिद्धेशःका
लविप्लुतं प्रोवाचासुरयेसांख्यंतत्वग्रामविनिर्णयम् १० षष्ठमत्रेरपत्यत्वंवृतःप्राप्तोनसूयया आन्वीक्षिकीमल
र्कायप्रह्लादादिभ्यऊचिवान् ११

२ मोचकत्वं

ततोत्रान्निर्गतंकर्मबंधहेतुत्वंयेभ्यस्तानिनिष्कर्माणितेषांभावोनैष्कर्म्यंकर्मणामेवमोचकत्वंयतोभवतितदाचष्टइत्यर्थः ८ तुर्येपंचतरिधर्मस्यकला
अंशःभागेभार्येत्यर्थः अर्द्धोवाएषआत्मनोयत्पत्नीतिश्रुतेः तस्याःसर्गेऋषिभूत्वेत्येकावतारंतांदर्शयति ९ कपिलावतारमाह आसुरयेतन्नाम्नेब्राह्मणाय
तत्वानांग्रामस्यसंघस्यविनिर्णयोयस्मिन्तत्सांख्यं १० दत्तात्रेयावतारमाहषष्ठमिति अत्रेरपत्यत्वंतेनैववृतःसन्प्राप्तः अत्रेरपत्यमभिकांक्षत आहतुष्ट

तिवक्ष्यमाणत्वात्तत्कथं प्राप्तः अनसूयया मत्तुल्यमपत्यमिच्छेणमामेवापत्यं प्राप्तवानिति दीक्ष्यन् ऋषिम कुर्वन् तत्सर्थे आन्वीक्षिकीं आत्मविद्यां प्रह्लादादि
भ्यऊच्च ११ यज्ञावतारमाह सप्तः यामाद्यैः स्वस्यैव पुत्रा यामानामदेवा तदाद्यैः सह स्वायंभुवमन्वंतरं पालितवान् तदा स्वयमिंद्रोभूदित्यर्थः १२ ऋषभा
वतारमाह सर्वाश्रमनमस्कृतमत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन् नाभेराग्नीध्रपुत्रात् ऋषभो जातः १३ पृथ्व्यवतारमाह पार्थिवं वपुः राजदेहं पृथुरूपपा

ततः सप्तम आकूत्यां रुचेर्यज्ञोभ्यजायत सयामाद्यैः सुरगणैरपात्स्वायंभुवांतरं १२ अष्टमे मेरुदेव्यां तु
नाभेर्जात उरुक्रमः दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं १३ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः
दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः १४

टीं गरे इत्योरिदं पार्थिवं औषधीरित्युपलक्षणं इमां पृथिवीं सर्वाणि वस्तूनि दोग्ध अदुग्ध अत एव आभावत्वार्थः हे विप्रास्तेन पृथ्वीदोहनेन सोयमवतार उश
त्तमः कमनीयतमः अवशकांतावित्यस्मात् १४

मत्स्यावतारमाह चाक्षुषमन्वंतरेयउदधिसंप्लवः मत्स्येवस्तस्मिन् यद्यपिमन्वंतरावसानेप्रलयोनास्तितथापिकेनचित्कौतुकेनसत्यव्रतस्यमायांदर्शितवान् यथा
र्कंडेयायेतिद्रष्टव्यं महीमय्यांनावितमेकार्णवायांमह्यामित्यर्थः अपाद्रक्षितवान् वैवस्वतमितिभविनोसंज्ञा १५ कूर्मावतारमाह कमठः कूर्मस्त
द्रूपेणएकादशेवतारेविभुर्दध्रेदधार १६ धन्वंतर्यवतारमाह धान्वंतरंधन्वंतरिरूपंद्वादशमादिमपोगतत्वाद्येः त्रयोदशमरूपंतच्चरितेनसहदर्शयति अपायय

रूपंसजगृहेमात्स्यंचाक्षुषोदधिसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुं १५ सुरासुराणामुदधिंमथ्नतांमंदराचलं
दध्रेकमठरूपेणपृष्ठएकादशेविभुः १६ धान्वंतरंद्वादशमंत्रयोदशममेवच अपाययत्सुरानन्यान्मोहिन्यामोहय
न्स्त्रिया १७ चतुर्दशंनारसिंहंबिभ्रद्दैत्येंद्रमूर्जितं ददारकरजैर्वक्षस्येरकांकटकृद्यथा १८ पंचदशंवामनकंकृ
त्वागादध्वरंबलेः पदत्रयंयाचमानःप्रत्यादित्सुस्त्रिविष्टपं १९ अवतारेषोडशमेपश्यन्ब्रह्मद्रुहोनृपान् त्रिःस
प्तकृत्वःकुपितोनिःक्षत्रामकरोन्महीम् २० ततःसप्तदशेजातःसत्यवत्यांपराशरात् चक्रेवेदतरोःशाखादृष्ट्वापुं
सोल्पमेधसः २१

दित्यत्रसुधामित्यध्याहारः मोहिन्यास्त्रियारूपेणअन्यानसुरान्मोहयन् धन्वंतरिरूपेणामृतमानीयमोहन्या अपाययदित्यर्थः १७ नृसिंहावतारमाह नारसिं
हंरूपंबिभ्रत् एरकांनिर्ग्रंथितृणं १८ वामनावतारमाह इष्टानांवामंनयतीतिवामनकंरूपंगृहीत्वा प्रत्यादित्सुःप्रत्यादातुमिच्छुः १९ पर
शुरामावतारमाह अवतारेतित्रिभिर्गुणांपर्यायोभवतितथासप्तकृत्वःसप्तवारानेकविंशतिवारानित्यर्थः २० व्यासावतारमाह अल्पमेधसः अल्पप्रज्ञान्पुंसो
दृष्ट्वातदनुग्रहार्थंशाखाश्चक्रे २१

२८

रामावतारमाह नरदेवत्वं राघवत्वं प्राप्तः सन् अत ऊर्ध्वं समुद्रादेः २२ रामकृष्णावतारमाह विंशतितमे इति वक्तव्ये एकारलोपश्छांदसः तेनैकोनविंशे विंशतितमे च रामकृष्णाविति

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं २२ एकोनविंशतितमे वृष्णिषु प्राप्य जन्मनी रामकृष्णाविति भुवो भगवानहरद्भरं २३ ततः कलौ संप्रवृत्ते संप्रवृत्ते संमोहाय सुरद्विषाम् बुद्धो नाम्नाजिनसुतः कीकटेषु भविष्यति २४ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु जनिता विष्णुयशसो नाम्ना कल्की जगत्पतिः २५

वंनामनी जन्मनी प्राप्य २३ अजिनसुतः जिनसुत इति यदि जिनः स एव कीकटेषु मध्ये गयाप्रदेशे २४ कल्क्यवतारमाह युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात्सकाशात् जनिता जनिष्यति २५

अनुक्तसर्वसंग्रहार्थमाह अवतारा इति असंख्येयत्वे दृष्टान्तः यथेति अविदासिनः उपक्षयशून्यात् दस्युउपक्षयरहितस्मात्सरसस्सकाशात् कुल्याः क्षुद्रप्रवाहाः २६ विभूतीराह ऋषय इति २७ तत्र विशेषमाह एते चेति पुंसः परमेश्वरस्य केचिदंशाः केचित्कला विभूतयस्तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वेऽपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं नारदादिष्वधिकारिकेषु यथोपयोगमंशकलावेशः पृथ्वादिषु शक्त्यावेशः कृष्णस्तु भगवान्साक्षान्नारायण एवाविर्भूतः सर्वश क्तित्वात्तेषां प्रयोजनमाह इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति २८ एतत्कीर्तनफलमाह जन्मेति गुह्यमतिरहस्यं जन्म प्रयतः शुचि

अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः २६ ऋषयो मनवो देवा मनुपुत्रा महौजसः कलाः सर्वे हरेरेव सप्रजापतयस्तथा २७ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम इंद्रारिव्याकुलं लोकं मृडयन्ति युगे युगे २८ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते २९ ए

तद्रूपं भगवतो ह्यरूपस्य चिदात्मनः

सन् २९ दुःखग्रामात्संसाराद्विमुच्यत इत्युक्तं तत्र कथं देहद्वयसंबंधरहितनिरवद्विमुक्तेरित्याशंक्य देहद्वयसंबंधस्य भगवन्मायोत्थाविद्याविलसितत्वात् एतच्छ्रू वणादिजनितविद्यया निवृत्तिरुपपद्यत इत्याशयेनाह एतदिति पंचभिः अरूपस्य चिदेकरसस्यात्मनो जीवस्य एतत्स्थूलं रूपं शरीरं भगवतो मायोपात्त स्वगुणैर्महदादिरूपैर्विरचितं वस्तुत आत्मनि आत्मा रूपं न शरीरं कृतमित्यर्थः ३० कथमित्यपेक्षायां स्वरूपावरणेन तदध्यास इति सदृष्टान्तमाह यथा वायौ श्रितो मेघौघो नभसि आकाशे अबुद्धिभिर्जनैरारोपितः यथा पार्थिवो रेणुस्तद्धूसरत्वं वायावनिले एवं द्रष्टरि दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः ३१ ३१

भा० प्र०
१५

किंच अतः स्थूलाद्रूपात्परमन्यदपि रूपमारोपितमित्यनुषंगः कथंभूतं तत्परं यदव्यक्तं सूक्ष्मं तत्र हेतुः अव्यक्तगुणबृंहितं अव्यक्तः कारणरागादिपरिणामस्य यथाश्रयरि णामास्तैर्बृंहितं रचितं आकारविशेषरहितत्वादव्यक्तमित्यर्थः एर्थीः एतदेव कुतस्तत्राह अदृष्टाश्रुतवस्तुत्वात् यच्चाकारविशेषवद्वस्तु तद्द्रष्ट दादिभिः दृश्यते श्रूयते श्रूयते वा इंद्रादिवत् इदं तु न तथा तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह स जीवो जीवोपाधिः जीवो जीवेन निर्मुक्तो जीवो जीवं विहाय ग

मायागुणैर्विरचितं महदादिभिरात्मनि ः ३० यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ३१ अतः परं यदव्यक्तमव्यक्तगुणबृंहितम् अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ३२ ३२

तश्च्यादौ जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात् जीवोपाधिना तत्तया कथ्यत इत्यर्थः ननु स्थूलमेव भोगायतनत्वात् जीवस्योपाधिरस्तु किमन्यकल्पन येत्यत आह यद्यस्मात्तस्मात्पुनर्भवः पुनः पुनर्जन्म उत्क्रान्तिगत्यागतीनां तेन विनासंभवादिति भावः ३२ ३२ ३२ ३२ ३२

राम०
१५

तदिदमुपाधिद्वयमुक्तात्तद्द्वयवादेन जीवस्य ब्रह्मतामाह यत्र यदा इमे स्थूलसूक्ष्मरूपे स्वसंविदा स्वरूपसम्यक्ज्ञानेन न भनि षिद्धे भवतः ज्ञानेन प्रतिषेधार्हत्वे नभेवतेजमा
ह अविद्ययात्मनि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः कथंभूतं ब्रह्मदर्शनं ज्ञानैकस्वरूपं ३३ तथापि भगवन्मायायाः संसारिकार
णभूताया विद्यमानत्वात्कथं ब्रह्मतेति तत्राह यदीति असंदेहं संदेहवर्जं यदि वेदाः समाप्नुयुरितिवत् वैशारदी विशारदः सर्वज्ञ ईश्वरस्तदीया देवी स

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम् ३३ यद्येषोपरता देवी मा
या वैशारदी मतिः सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ३४ ३४ ३४ ३४ ३४ ३४

से सा स्वकेन क्रीडती एषा माया यद्युपरता भवति किमित्युपरता भवेत्तत्राह मतिर्विद्या अयंभावः यावदविद्या आत्मन आवरणविक्षेपौ करोति तावन्नो
परमति यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपेण जीवोपाधिं दग्ध्वा निरिंधनाग्निवत् स्वयमेवोपरमेदिति तदा संपन्नः ब्रह्मस्वरूपमाप्त एवेति
विदुस्तत्त्वज्ञाः किमतो यद्येवं स्वे महिम्नि परमानन्दस्वरूपे महीयते पूज्यते विराजत इत्यर्थः ३४ यथा जीवस्य जन्मादि मायाकृतमेवमीश्वरस्यापि जन्मकर्मादि

नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊतीः॥ नामानिरूपाणिमनोवचोभिःसंतन्वतोनटचर्या
मिवाज्ञः॥ २७॥

भा॰प्र॰
१६

मायेत्याह एवमिति अकर्तुः कर्माणि अजनस्यजन्मानिहृत्पतेरंतर्यामिनः २५ तर्हिजीवादीश्वरस्यकोविशेषः स्वातंत्र्यमेवविशेषइत्याह सवाइति षाड्गुणिकंऐश्वर्यषट्कं विषयं जिघ्रति आदत्ते गंधवत्स्वरूपेणगृह्णाति नतुसज्जतइत्यर्थः कुतः षड्गुणेशःषडिंद्रियनियंता २६ ननुकिमीश्वरस्यस्वमायादिकर्मभिर्विषयभोगेर्वातत्राह नचेति धातुर्जगत्विधातुरीश्वरस्यऊतीर्जगल्लीलाःकुमनीषःकुबुद्धिःनिपुणेनतर्कादिकौशलेननचवेत्तिनजानाति मन

एवञ्जन्मानिकर्माणिह्यकर्तुरजनस्यच वर्णयन्तिस्मकवयोवेदगुह्यानिहृत्पतेः २५ सवाइदम्विश्वममोघलीलस्सृजत्यवत्यत्तिनसज्जतेऽस्मिन् भूतेषुचान्तर्हितआत्मतन्त्रःषाड्वर्गिकञ्जिघ्रतिषड्गुणेशः २६ सवेदधातुः पदवींपरस्यदुरन्तवीर्य्यस्यरथाङ्गपाणेः योमाययासन्ततयानुवृत्त्याभजेततत्पादसरोजगन्धम ः २८
श्रीकृष्णः ॥ श्रीकृष्णः॰

सान्यपाणि वचसान्यपाणि ववसानामानिसंतन्वतःविस्तारयतःवचोभिरितिवहत्वंपुत्त्वभिप्रायेणमणोवचोभिःसहेतिवा २७ भक्तस्तुकथंविजानाति ताह सवेदेति अमायपाअकुटिलभावेनसंततयानिरंतरयाअनुवृत्त्यासेवयाआनुकूल्येनभजेत २८ २८ २८ २८ २८ २८ २८

श्रीम॰
१६

भागवतात्पर्यं अध्याय ३ धर्मः कं शरणं गतः इत्यस्य तमेव व्यासरूपिणं इष्टमिति उत्तरं कथ्यते इदं भागवतमित्यादिनेति मूलं ५ तइपरि
टीका ॥ इदं भागवतमित्यादिः प्रस्तुतेन असंगतिः प्रतीतस्तामाह ॥ धर्मइति ॥ इदं भागवतमित्यादिना व्यासेन भागवतस्य तमिति
उच्यते । तेन कथं प्रश्नस्योत्तरं लब्धमित्यत आह । तमेवेति । वेदव्यासेन धर्मस्थापनार्थं मेन भागवतं रतमिति भावः ॥

भक्तिमार्गे प्रवृत्तानां रुषीनभिनंदति अथेति यतो भक्त एव भगवत्तत्त्वं जानाति अथ अतः भगवतः सर्वज्ञा भवंतो धन्याः कृतार्थाः ज्ञानः यद्यस्मात् इत्थं वासुदेवे आत्म
भावं मनोवृत्तिं कुर्वंति सर्वात्मकं मे कांतिकं यत्र यस्मिन् भावे सति भूयः परिवर्तो जन्ममरणादावर्तो न भवति ३९ एतत्किमेतत्तत् शास्त्रमशेषं कायपसितन्नाह इदमि
ति ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्य चरितं यस्मिन्न तत्तत्र रुषिर्व्यासः ४० तत्संप्रदायप्रवृत्तिमाह तदिदमिति सुतं शुकं ४१ सर्ववेदेतिहासेति पद्यास्यान्तर्या ४२

अथेह धन्या भगवंत इत्थं यद्वासुदेवे खिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ३९ इदं भा
गवतं नाम पुराणं ब्रह्मसम्मितं उत्तमश्लोकचरितं चकार भगवानृषिः ४० निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् त
दिदं ग्राहयामास सुतमात्मवतां वरं ४१ सर्ववेदेतिहासानां सारं सारं समुद्धृतं स तु संश्रावयामास महाराजं परीक्षितम् ४२
प्रायोपविष्टं गंगायां परीतं परमर्षिभिः कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ४३ कलौ नष्टदृशामेष पुराणार्को धुनो
दितः तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ४४ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् सोहं वः श्रावयिष्यामि य
थाधीतं यथामतिः ४५

प्रायेण मृत्युपर्यंतं अनाशकेनोपविष्टमिति परमवैराग्योक्तिः ४३ हे विप्राः विप्रर्षेः सकाशादध्यगमं ज्ञातवानस्मि तत्र कीर्तयतः तत्र निविष्ट इति चान्वयभेदात्तत्रपद
वृत्तिर्न दोषः ४४ यथाधीतं न तु स्वमतिविलसितं तत्रतु यथामतिः स्वमत्यनुसारेण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ४५ इति प्रथमे तृतीयः ३ तुर्ये भागवता
रंभकारणाविनवार्यते व्यासस्यापरितोषस्तु नयः प्रश्नवचनादिभिः १ इत्येवं प्रस्तुतं श्रावयिष्यामीति ब्रुवाणं मुनीनां मध्ये एकेन वक्ता येयोवृद्धः वेदेष्वपि वृ

ऋषयोबह्वृचःऋग्वेदीतेनवक्तव्यंअतएवंभूतत्वात्शौनकोब्रवीत् १ पुण्यांकथामाह २ कस्मिन्वास्थानेकेनवाहेतुनेतिमहाभारतादिधर्मशास्त्रा

इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेतृतीयोध्यायः ३ व्यासउवाच इतिब्रुवाणंसंस्तूयमुनीनांदीर्घसत्रिणांवृद्धःकुलपतिःसूतंबह्वृचःशौनकोब्रवीत् १ शौनकउवाच सूतसूतमहाभागवदनोवदतांवर कथांभागवतींपुण्यांयदाहभगवाञ्छुकः २ कस्मिन्युगेप्रवृत्तेयंस्थानेवाकेनहेतुना कुतःसंचोदितःकृष्णःकृतवान्संहितांमुनिः ३ श्रीकृष्णः

णिकृतवतःपुनरेतत्संहिताकरणेकिंकारणमित्यर्थः कुतइतिसार्वविभक्तिकस्तसिः केनप्रवर्तितइत्यर्थःकृष्णोव्यासः ३ ३ ३ ३ ३

पठंतं स तु सुतं श्रावयामासेति तत्र शुकस्य व्यासात्मजत्वाद्विवेकाद्यं घटितमिति तस्य पुत्र इत्यादि तस्यात्मजो गोदासीन नामा तस्येति समदृक् समं ब्रह्म पश्यति अतो निर्विक
ल्पकः स्वार्थैकः निरस्तभेदः किंच एकस्मिन्नेवकंगः समाधिर्यस्मात् तथाभूता मतिर्यस्य सः यत उन्निद्रः मायाशयनाद्व्युत्थितः या निशा सर्वभूतानां तस्यां
जाग्रत्ति संयमीति स्मृतेः अत एव गूढः स्वरूपप्रकाशः मूढ इव प्रतीयते ४ निर्विकल्पत्वमेव दर्शयति दृष्ट्वेति आत्मजं शुकं प्रव्रजंतं अनुयांतं अनुगच्छंतं

तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः एकांतमतिरुन्निद्रो गूढो मूढ इवेयते ४ दृष्ट्वानुयांतमृषिमात्मजमप्य
नग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विवि
क्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् उन्मत्तमूकजडवद्विचरन्गजसाह्वये ६ कथं
वा पांडवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ७ स गोदोहनमात्रं हि गृहेषु गृहमेधि
नां अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमं ८

ऋषिमात्मजमप्यनग्नमपि दृष्ट्वा जलक्रीडासक्ताः देव्यो ह्रिया लज्जया वस्त्रपरिधानं कृतव
त्यः अनग्नमपि तं नैनार्थात्सुतो नग्न इत्युक्तं नग्नस्य पुरतो गच्छतः सुतस्य तु ह्रिया न परिदधुस्तच्चित्रं वीक्ष्य पृच्छति स्त्रीपुंभिदा भेद
स्तवास्ति विविक्तात्मदृष्टेः पुत्रस्य तु नास्ति ५ एवंभूतोसौ कथमालक्षितो ज्ञातः कुरुजांगलाख्यदेशविशेषान् संप्राप्तः अथ मत्तो गजसाह्व
ये विचरन् गजेन सहितं आह्वयो नाम यस्य तस्मिन् हस्तिनापुरे लक्षितो नाम राजनि निर्मितत्वात् ६ एवंभूतेन मुनिना सह यत्र संवादे एषा सात्वती श्रुतिः

संहिता ७ एतद्व्याख्यानं बहुकालावस्थानापेक्ष्यं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह सहति गोदोहनमात्रं कालं प्रतीक्षते तदपि न भिक्षार्थं किं तु ऐषा माश्रमं गृहं तीर्थी कुर्वन्नपवित्रीकुर्वन् तस्मादेवं भूतोत्र वर्त्मन्यां श्चर्यं पश्रीगनुत्तु चरितमतीवाश्चर्यं पृच्छतोऽतः कथयेत्याह अभिमन्युसुतमिति पंचभिः सूरीणां हि कथय ९ सम्राट् चक्रवर्ती चेति

अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ९ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्द्धनः प्रायोपविष्टो गंगायामनादृत्याधिराट् श्रियम् १० नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ११

तिविति केवलं कस्य वा हेतोः कस्मात्कारणादधिराट् श्रियं संपदमनादृत्य १० यस्य पादनिकेतनं चरणपीठं हस्त्वदंधनान्यानीय शत्रवो नमंति स्वं गृहे रूतउवाततउपाए एवमेतेच्छन्नत्यार्थमात्मनेपदं असुभिः प्राणैः सहत्यक्तः

भागवततात्पर्ये ९ पूर्वयुगस्य पर्यये पर्यवसानं प्राप्ते सति तृतीयं द्वापरं जातं तस्य तथा प्रतीतेर्यावत् । तृतीय इति ।। तेन युगं द्वापरस्य तृतीयावृत्तिवि स्वरूपं द्वापरस्य तेन संबंधो दर्शितः पर्यय द्वापरस्य पर्यये द्वापरस्य पर्यवसानं प्राप्ते द्वापरे तेन नान्वय इति भावेन प्राप्ते सतीत्यभ्युपगच्छति । तेन द्वापरांते व्या सावतार इति सिद्धमिति ज्ञातव्यं ॥

विरक्तस्य किं धनादिभिरिति चेत्तत्राह लोकस्य शिवाय सुखाय भवाय समृद्ध्यै भूतये अभ्युदयाय च ये जीवंति न त्वात्मार्थं एवं सति असौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच न हि ये परार्थं जीवनं च येन त्यजंति न मुंचंतीत्यर्थः १२ यत्किंचन पृष्टोसि तत्सर्वं नो स्माभ्यं समाचक्ष्व यद्यस्मात् त्वां विषये रागी वेदार्थे स्नातं पारंगतं त्वां मन्ये छांदसाद्वेदादन्यत्र वैदिकव्यतिरिक्ते राज्ञश्चरित्रे विशेषज्ञत्वात् १३ कस्मिन्युग इत्यादिप्रश्नानां व्यासजन्मकथनं पूर्वकमुत्तरमाह

शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं १२ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् १३ सूत उवाच द्वापरे समनुप्राप्ते तृतीये युगपर्यये जातः पराशराद्योगी वासव्यां कलया हरेः १४ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः विविक्त एक आसीन उदिते रविमंडले १५ परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे १६ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः १७ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् १८ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं १९ ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः

द्वापरे समनुप्राप्ते अभेदे त्वपेक्षायामाह तृतीये युगस्य पर्यये परिवर्ते वासव्यां उपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः १४ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः आसीनो बभूवेति शेषः विविक्ते देशे इत्यादि विविक्ते कस्यार्थमुक्तं अनेनैव बदरिकाश्रमस्थानं सूचितं १५ तत्र च स ऋषिर्युगधर्म

व्यतिकरंदिक्ंवीक्ष्यसर्ववर्णाश्रमाणांचपश्यन्हितंतद्दध्यौवितितत्तीपिनान्वयःयएवरत अतीतानागतवित्अव्यक्तंरंहोवेगोयस्यतेनकालेनयुगधर्माणांव्यतिकरंसंकरंवीक्ष्य तथाभविष्यगेयुगे १६ भौतिकानांशरीरादीनांतन्होतंकालकृतंनिःसत्वान्धैर्य्यस्वल्पायुष डुर्मेधान्मंदमतीन् १७ अमोघदृक्तत्वेतान्संपन्नः १८ ततश्चातुर्होत्रोपलक्षि

इतिहासपुराणंचपंचमोवेदउच्यते २० तत्रर्ग्वेदधरःपैलःसामगोजैमिनिःकविः वैशंपायनएवैकोनिस्नातोय जुषामुत २१ अथर्वांगिरसामासीत्सुमंतुर्दारुणोमुनिः इतिहासपुराणानांपितामेरोमहर्षणः २२ तएत ऋषयोवेदंस्वंस्वंव्यस्यन्ननेकधाशिष्यैःप्रशिष्यैस्तच्छिष्यैर्वेदास्तेशाखिनोभवन् २३ २३ २३ २३
श्रीकृष्ण २३ श्रीकृष्ण०

ताश्चत्वारःऋत्विजश्चातुर्होत्रंतैरनुष्ठेयंकर्मचातुर्होत्रंशुद्धंशुद्धिंसंस्यतसंततैप्रजानांमाविच्छेदाय १९ चातुर्विध्यमेवाह ऋगित्यादि उद्धृताःपृथक्कृताः २० दारुणःअथ र्वोक्ताभिचारादिप्रवर्तकः २२ अस्यविभक्तवंतः २३

पंक्तिः२ वेदार्थाधिकारिणां कर्मश्रेयसि मूढानां ब्राह्मणादिद्वारा कर्मबोधनीयमिति कृपया भारतं कृतं न तु ब्राह्मणादीनां तत्रानधिकार इति भावः ॥
१ असंतोषे अलंबुद्धिः ॥ सुखाकथां न तुष्यामि हरेरन्यकर्मणि इति मात्रेय ॥ अप्रसादस्त्वस एव ॥ सरेव संतोषएव ॥ कः प्रसन्नो भवद्विष्णोः कथां शृण्वन्
हरेः परां मिति

वेदविभागमयोगमाह त एव वेदा इति स्वर्णमतिमेधादिभिर्धार्यंते त एव २४ किंच स्त्रीशूद्रेति द्विजबंधवस्त्रैवर्णिकेष्वधमास्तेषां कर्मश्रेयसि श्रेयःसाधने एवं भवेत् अनेन प्र
कारेण भवन्तिति अत एव तेषां कृपया भारताख्यानं मुनिना कृतं २५ भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा २६ नातिप्रसीदत् हृदयं यस्य सः चित्तप्रसादहेतुं
वितर्कयन् इदमुवाच तदाह २७ मानिताः पूजिताः २८ दैह्यो देहोद्भवः आत्मा जीवो वस्तुतो विभुः परिपूर्ण एव आत्मना स्वेन रूपेण असंपन्न इत्यस्मदात्मभेदा

पया १ वं

त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा एवं चकार भगवान्व्यासः कृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा क
र्मश्रेयसि मूढानां श्रेय एवं भवेदिह २५ इति भारतमाख्यानं कृपया मुनिना कृतं एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः स
र्वात्मकेनापि यदा नातुष्यद्धृदयं ततः २६ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ वितर्कयन्विविक्तस्थ इदं चोवाच धर्म
वित् २७ धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः मानिता निर्व्यलीकेन गृहीतं चानुशासनम् २८ भारतव्यपदे
शेन ह्याम्नायार्थश्च दर्शितः दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत २९ अथापि बत मे दैह्यो ह्यात्मा चैवात्म
ना विभुः असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः ३०

ति किंभूतस्य अश्रुभिः कलिलं व्याप्तं मिश्रं अंजनं ययोस्ते च ते संभ्रमव्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं निनीय अधःकृत्वा ताडयिष्यतीति भयस्य भावनया स्थितस्य यद्य
स्मात्तः भीरपि स्वयं विभेति ततस्ते दशा ॥ ३१ ॥ अत एव जगन्मोहनत्वात् दुर्ज्ञेयत्वात्तव जन्मादि बुधा अन्यथा वर्णयंतीत्याह केचिदिति चतुर्भिः पुण्यश्लोकस्य प्रियस्य युधिष्ठि
रस्य कीर्तये यदोरेव कीर्तये इति वा मलयस्य कीर्तये वंशे वा चंदनं यथा ॥ ३२ ॥ तथा वसुदेवकां भार्यायां प्रार्थ अज एव त्वमभ्यगात् पुत्रत्वमिति शेषः प्रथमपक्षे पुरुषार्थः

गोप्याददे त्वयि कृतागसि दाम यावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रं निनीय भयभावनया स्थितस्य सा मां वि
मोहयति भीरपि यद्बिभेति ॥ ३१ ॥ केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये यदोः प्रियस्यान्ववाये मलयस्येव चंदनं
॥ ३२ ॥ अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषां ॥ ३३ ॥ भारावतारणा
यान्ये भुवो नाव इवोदधौ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ ३४ ॥ भवेऽस्मिन्क्लिश्यमानानामविद्याकामक
र्मभिः श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥ ३५ ॥

अभ्यगमिति पाठः सुगमः ताभ्यामपि पूर्वं सुतपापृश्निरूपाभ्यां याचितः सन् अस्य जगतः क्षेमाय ॥ ३३ ॥ आत्मभुवेति ब्रह्मप्रार्थनस्य प्राधान्यविवक्षया मतांतरं ॥ ३४ ॥ परमा
नंदस्वरूपाज्ञानमविद्या ततो देहाद्यभिमानात्कामः ततः कर्माणि तैः क्लिश्यमानानां तन्निवर्तकेय श्रवणाद्यर्हाणि कर्माणि करिष्यन् ॥ ३५ ॥ अस्य पक्षस्य सिद्धांतताम
भिप्रेत्य श्रवणादिफलमाह शृण्वंतीति नंदंति अन्यैः कीर्त्यमानमभिनंदंति चे ये जनाः ईहितं चरितं तावकं त्वदीयं यद्वा तु जे त एव पश्यंत्येव अचिरेणैवेति च सर्वे

भा०प्र०
४०

त्तावधारणं कीदृशंभवप्रवाहस्यजन्मपरंपरायाउपरमोयस्मिन्तत्त ३६ इदानींतवास्मत्परित्यागोऽनुचितइत्याशयेनाहअपीतिचतुर्भिः हेप्रभोसुहृदोनुजी
विनस्त्वंनोऽद्यअपेक्षित त्वंजिहाससियेषामस्माकमन्यत्परायणंनैवास्ति कुतः राजसुयोजितमंहोदुःखंयैस्तेषांस्वानांकृतमीहितंयेनहेस्वकृतेहिततेनतत्संबोधनंवि
सर्गांतपाठेत्वंपदविशेषणम् ३७ ननुतवंवधवोयादवाःपुत्राश्चपांडवाःशूराःसमर्थाश्च ततःकिंकार्यमपेक्षसेअतआह केवयमिति यर्हिभवतोऽदर्श

स्व

शृण्वंतिगायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं
३६ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहाससिस्वित्सुहृदोनुजीविनः येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयो-
जितांहसां ३७ केवयंनामरूपाभ्यांयदुभिस्सहपांडवाः भवतोदर्शनंयर्हिहृषीकाणामिवेशितुः ३८ ३८
श्रीकृष्ण ३८ श्रीकृष्णः०

नंयदात्वमस्मात्त्वंपश्यसि तदानाम्नाविख्याताःरूपेणसमृद्धाश्चयदुभिःसहिताःपांडवानामकेवयंनकेपिअत्रतुदृष्टांतः हृषीकाणामीशितुर्जीवस्या
दर्शनेयथानकिंचित्नामरूपंचततद्वत् ३८

राम०
४०

किंच यथेदानीमियमस्मत्पाल्माभूमिः स्वैरसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरंकिता सती भाति तत्र तदा त्वयि निर्गते सति न शोभिते ३९ अवि
च इमे जनपदा देशाः स्वङ्गाः सुमध्यङ्गाः सन्तः ४० गमने पाण्डवानाम् अशल्यगमने च यादवानामित्युभयतोव्याकुलचित्तः सन्नीतेषु स्नेहनिवृत्तिं प्रार्थयते अथेति विश्वे
शेत्यादि संबोधनानि स्नेहच्छेदे सामर्थ्यख्यापनाय दृढं सन्तं ४१ ततः किमत आह त्वयीति अनन्यविषया सतीयमतिः रतिमुद्वहतात् अनवच्छिन्नां प्रीतिं करो
त्वित्यर्थः ओघं स्वरूपं यागोगमतिं बंधं नगणापत्तिरेवं मतिरपि विघ्नान्गणापत्तिरिति भावः ४२ एवमभ्यर्थ्य पुनः प्रणमति श्रीकृष्ण तुभ्यं नमः उपकारेण नुस

नेयं शोभिष्यते तत्र यथेदानीं गदाधर त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ३९ इमे जनपदाः स्वृद्धाः सुपक्वौषधि
वीरुधः वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः ४० अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे स्नेहपाशमिमं छिं
धि दृढं पांडुषु वृष्णिषु ४१ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ४२ श्रीकृ
ष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोद्विजसुरार्तिहरावतारयोगेश्वराखिलगुरो भ

रेतीव कृष्णो वृष्णिपतिः कृष्णसख इत्यर्जुनस्य सखेव वृष्णीनां ऋषभ श्रेष्ठ अवन्यां पृथ्व्यां ये द्रुह्यन्ति ते राजन्यास्तेषां वंशस्य दहन एवं तत्रापि अनपवर्गवीर्य अक्षीणप्रभाव गोवि
दं प्राप्तकामधेन्वैश्वर्य गोद्विजसुराणामार्तिहरोऽवतारो यस्येति ४३ कलानि मधुराणि पदानि पठन्तीं कुन्तीं परिणतोऽखिल उदयो महिमा यस्य सः स्मितलता वि
त्यस्मात्परिगृत्तेति वाक्यशेषः छंदोनुरोधेन मंदमीषत् तस्य हासस्य माया वस्यति हि हारोजनोन्मादकरो च मायेति ४४ ॥ छ ॥ छ ॥ छ ॥ छ

त्वयि मेनन्यविषया मतिरिति यत्प्रार्थितं तद्दृढमित्यंगीकृत्य परं स्वस्थानाद् गजाह्वयं प्रत्यागत्य पृथ्वां तां च अन्याश्चातां च अन्याश्च सुभद्राप्रमुखाः स्त्रियः उयास्य
त्यश्चानुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णा अत्रैव कंचित्कालं निवसेति संप्रार्थ्य निवारितः ४५ अथ भीष्मनिर्याणे तत्रैव कृष्णेन पोद्घातकथां प्रस्तौ
ति व्यासाद्यैः प्रबोधितोपि युधिष्ठिरः सन्नाबुध्यत विवेकं न प्राप तत्र हेतुः ईश्वरेहाज्ञैः स्वभक्तभीष्मनिर्याणमहोत्सवापराज्ञा सह ज्ञातुं द्रष्टुं अंगं गंतुं तत्र

सूत उवाच पृथयेत्थं कलपदैः परिणुताखिलोदयः मंदं जहास वैकुंठो मोहयन्निव मायया ४४ तां बाढ
मित्युपामंत्र्य प्रविश्य गजसाह्वयं स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः ४५ व्यासाद्यैरीश्वरेहा
ज्ञैः कृष्णेनाद्भुतकर्मणा प्रबोधितोपीतिहासैर्नाबुध्यत शुचार्पितः ४६

तत्प्रसंगेनैवायं प्रबोधनीय इति ईश्वराभिप्रायः कार्यद्वयविधायकः तमजानद्भिरित्यर्थः श्रीकृष्णेनापि प्रबोधितो नाबुध्यत तत्र हेतुः अद्भुतकर्मणा यथा कुरु
पांडवसंधानार्थं गतोपि यथोचितमेव वदन्नपि विग्रहमेव दृढीकृतवान् एवमत्रापि प्रबोधयन्नबोधमेव दृढीचकारेत्यर्थः ४६ ४८ ४६

भागवतात्सये अ० ८। शाश्वतमपौरुषेयवेदवचनं॥ तच्च॥ यः क्षत्रियः पराजितं सच्चात्तुमर्हस्य प्रजी। यः सा द्विनं हंतिसोग्निशोमस्यफलभाक्
वाहंतिगजरयेसोश्वमेधराजसूयाभ्यामिसादृशा भवनं वच्चद्गति ३५।

अवोधमेवप्रपंचयति आहेति षड्भिः प्राकृतेन अविवेकव्याप्तेन आत्मना चित्तेन हे विप्राः ४७ पारक्यस्य श्वशृगालाद्याहारस्य देहस्यार्थे मेमया अक्षौहिणीः अक्षौहिणय अक्षौ
हिणीप्रमाणं व्यासेनोक्तं अक्षौहिणीप्रसंख्याता रथानां द्विजसत्तमाः संख्यागणानतत्वज्ञैः सहस्राण्येकविंशतिः शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः २१८७०
जानीयप्रसंख्यनेमनदेवप्रकीर्तितं २१८७० ज्ञेयशतसहस्रं तु सहस्राणि नवैव तु नराणामपि पंचाशच्छतानि त्रीणि चैव हि १०९३५० पंचषष्टिसहस्राणि तथा

आह राजा धर्मसुतश्चिंतयन्सुहृदां वधं प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः ४७ अहो मे पश्यताज्ञानं हृदि रूढं दुरा
त्मनः पारक्यस्यैव देहस्य बह्व्यो मेक्षौहिणीर्हताः ४८ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः न मे स्यान्निरयान्मोक्षो
ह्यपि वर्षायुतायुतैः ४९ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां इति मे न तु बोधाय कल्पते शासनं वचः ५० स्त्री
णां मद्धतबंधूनां द्रोहो योसाविहोत्थितः कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ५१ ५१ ५१ ५१

भाग० शाश्वत
मितिपाठांतरं

श्वानां शतानि च दशोत्तराणि षट्प्राहुः संख्यातत्वविदो जनाः ६५६१० एतामक्षौहिणीमाहुर्यथावदिह संख्ययेति ४८ सुहृदः संबंधिनः मित्राणि सखायः पि
तरः पितृव्याः ४९ द्विषां वधः हे एनः पापं न भवतीति पच्छासनं शिक्षारूपं च वचः अतो न कल्पते पततत्वचः प्रजाभर्तुरेव अपं भावः स्वप्रजानामन्यतो वधे यत्र
के न दृष्टो न ज्ञातः दुर्योधनेन तु प्रजापीडा या स्यमानायां मयाकेवलं राज्यलोभेन हतत्वात्पापमेवेदमिति ५० किं च द्रोहो संबंधोऽभवत् तेनापधर्मैः स्त्रीणां तु भ

प्राहन्नात धृष्टोपासांतासायोसौद्रोहोनुद्दिष्टोप्युप स्थितः तंव्यपोहितुं यथाकार्णकल्पः समर्थोनाहं गृहमेधीयैर्गृहाश्रमविहितैः ५१ ननुच पाप्मानं तरति ब्रह्महत्यां योश्वमेधेनयजेतयउचैनमेवंवेदेतिश्रुतेः पापमश्वमेधेननश्येदेवेत्याशंक्याविवेकविजृंभितंहेतुवादमाश्रित्यनिराकरोति यथाघनपंघनपंकेनपंकोभो नमृज्यते यथावासुरालेशकृतमयाविन्द्यवह्यासुरयानमृज्यते तथैवंभूतहत्यामेकांप्रमादतोजाता उद्दिश्यवंहिंसाप्रायैर्यज्ञैर्मार्ष्टुशोधयितुंनार्हतीति ५२

यथापंकेनपंकांभस्सुरयावासुराकृतं भूतहत्यांतथैवैकांनयज्ञैर्मार्ष्टुमर्हति ५२ इतिश्रीभागवतेप्रथमस्कंधेपरी क्षितयुधिष्ठिरानुतापोऽष्टमोध्यायः ८ सूतउवाच इतिभीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ततोविनशनंप्रा गाद्यत्रदेवव्रतोपतत् १ श्रीकृष्ण ः०

इतिश्रीभागवतेप्रथमस्कंधेपरीक्षितयुधिष्ठिराजनायोष्टमोध्यायः ८ युधिष्ठिरप्रभीष्मेनसर्वधर्मनिरूपणं कृष्णस्तुतिश्चमुक्तिश्चनवमेतस्यवर्ण्यते १ पदर्थंतयाविवेकः श्रीकृष्णेनसंवर्धितस्तंदर्शयति इतीतिसर्वेषांधर्माणांविवित्सयाविदितुमिच्छयाविनशनंकुरुक्षेत्रंदेवव्रतोभीष्मः १ १

संतःचिरुद्धाश्चापिपुत्रेरथैः ३ तत्रतदातत्रासन्नतान्द्रष्टुमिवागतास्तत्पर्थैःभरतपुंगवंभीष्मं ५ रेणुकासुतः परशुरामः ६ ब्रह्मरातः शुकः अंगिरसोबृहस्पतिः ८ वसूत्तमोभीष्मः
९ हृदिस्थंसंतंपुरतआसीनंपूजयामास १० उपासीनान्समीपेउपविशान्प्रश्रयोविनयः प्रेमस्नेहः ताभ्यांसंगतानुपस्रान् यदांतरेताभ्यामवनतान् आपार

तदातेभ्रातरस्सर्वेसदश्वैस्स्वर्णभूषितैः अन्वगच्छन्रथैर्विप्राव्यासधौम्यादयस्तथा २ भगवानपिविप्रर्षेरथेनसधनंजयः
सतैर्व्यरोचतनृपः कुवेरइवगुह्यकैः ३ दृष्ट्वानिपतितंभूमौदिवश्च्युतमिवामरं प्रणेमुः पांडवाः भीष्मंसानुगास्सहचक्रिणा
४ तत्रब्रह्मर्षयस्सर्वेदेवर्षयश्चसत्तम राजर्षयश्चतत्रासन्द्रष्टुंभरतपुंगवं ५ पर्वतोनारदोधौम्योभगवान्बादरायणः बृ
हदश्वोभरद्वाजः सशिष्योरेणुकासुतः ६ वशिष्टइंद्रप्रमदस्त्रितोगृत्समदोसितः कक्षीवान्गौतमोत्रिश्चकौशिको
थसुदर्शनः ७ अन्येचमुनयोब्रह्मन्ब्रह्मरातादयोमलाः शिष्यैरुपेताआजग्मुःकश्यपांगिरसादयः ८ तान्समेतान्म
हाभागानुपलभ्यवसूत्तमः पूजयामासधर्मज्ञोदेशकालविभागवित् ९ कृष्णंचतत्प्रभावज्ञआसीनंजगदीश्वरं हृ
दिस्थंपूजयामासमाययोपात्तविग्रहं १० पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् अभ्याचष्टानुरागाश्रैरंधीभूतेन

९८

११ अभ्यभाषत अनुरागाश्रैः स्नेहाश्रुभिः अंधीभूतेनचक्षुषाउपलक्षितः ददर्शेतिवा ११ अभिभाषणमाह अहोइति एकादशभिः हेधर्मनंदनाः क्लिष्टं यद्याभवत्
ंजीवितुंनार्हथ यस्यरंश्रियत् एतदहोकष्टंजुगुप्सितमन्याय्यंचैतत् पतोप्रपंविप्राः धर्मोऽच्युतश्च आश्रयोकिंचस्थितेबालाः प्रजापस्याः सातवेक्षितिंदेत्सदर्शितेनोक

न्यपरमाणि नहतीश्वपर्यंत्यैः सहक्लेशान्प्राप्नोत्यर्थः १३ कालकृतत्वेन शोकं निवारयति सर्वमिति द्वाभ्यां भवतामपि यद्वशेयस्य वशवर्ती १४ अहोदुर्घटघटना

अहोकष्टमहोन्याय्यं यद्यूयं धर्मनंदनाः जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः १२ संस्थितेऽतिरथे पांडौ
पृथा बालप्रजा वधूः युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः १३ सर्वं कालकृतं मन्ये भवतां च यदप्रियं स
पालो यद्वशे लोको वायोरिव घनावलिः १४ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः कृष्णोऽस्त्री गांडिवं चापं सुहृ
त्कृष्णस्ततो विपत् १५ श्रीकृष्णः०

यद्वा कालकृतत्वमाह यत्रेति कृष्णोऽर्जुनः अस्त्री धन्वी ततः तत्रापि विपत् उग्रापशारीरवलात्सर्वं दैवकृतसंपत्तावयीत्यर्थः १५ १५ १५ १५ १५

ननु कृष्णं कथं कालोतिक्रामेदित्यपेक्षायामाह नहीति अस्य श्रीकृष्णस्येत्युगस्या निर्दिशति विधित्सितं कर्तुमिष्टं यस्य विधित्सितं तस्य विजिज्ञासया १६ इदं तस्मा
दिदं दैवं तत्र मीश्वराधीनं व्यवस्य निश्चित्य तस्येश्वरस्यानुविहितः अनुवर्ती सन् कर्तेरितिः हे नाथ परंपरागतस्वामिन् प्रभो समर्थ अनाथाः प्रजाः पाहि १७ अनु
विधेयः परमेश्वरः श्रीकृष्ण एवेत्याह एष एव भगवान्नतेश्वरः स्वतः आद्यः पुमान् तत्त्वकृतः यतो नारायणः साक्षात् १८ गूढ यया दृश्यति अस्येति अनुभावं प्रभावं १९

न ह्यस्य कर्हि विद्राजन्पुमान्वेदविधित्सितं यद्विजिज्ञासयायुक्ताः मुह्यंति कवयोपिहि १६ तस्मादिदं दैवतंत्रं व्यवस्य
भरतर्षभ तस्यानुविहितोनाथा नाथ पाहि प्रजा विभो १७ एष वै भगवान्साक्षादाद्यो नारायणः पुमान् मोहयं
मायया लोकं गूढश्चरति वृष्णिषु १८ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृ
प १९ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं अकरोः सचिवं दूतं सौहृदादथ सारथिम् २० सर्वात्मनः समदृ
शो ह्यद्वयस्यानहंकृतेः तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् २१ तथाप्येकांतभक्तेषु पश्य भूपानुकंपि
तं यन्मे सूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः २२

यमत्र नाथमिवं यन्मन्यसे मातुलेयं मातुलस्य देवस्याः सुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्ता
रं सुहृत्तमम् उपकारानपेक्षोपकारकं च सौहृदाद्विश्वासात् अकरोः कृतेनवानसि सचिवं मंत्रिणं २० ननु ईश्वरश्चेत् कथं नीचे सारथ्यादौ प्रवृत्तः तत्राह सर्वेति त
त्कृते नीचोच्चकर्म कृते ममयोपमयोग्यमिति मतिवैषम्यं क्वचिदपि नास्ति कुतः निरवद्यस्य रागादिशून्यस्य तत्कुतः अनहंकृतेः तत्कुतः अद्वयस्य तदपि
कुतः समदृशः तत्रापि हेतुः सर्वस्यात्मनः यद्येषं वा सहेतु हेतुमद्भावः २१

तथापिसमस्वेपि हे भूप अनुकंपितमनुकंपाम् २२ इदानीदेहत्यागपर्यंतंश्रीकृष्णावस्थानम् प्रार्थयनेभक्तियोगिद्वाभ्याम् २३ यावदितिविलंवं घोतय
पति अहंहिनोमित्यजामिइतिस्वातंत्र्यम् इदमित्यात्मज्ञानेन ज्ञानंप्रसन्नहासेनअरुणलोचनाभ्यांच उल्लसत्सुचिरंमुखांबुजंयस्यसंध्याविषयःपो

भक्त्यावेश्यमनोयस्मिन्वाचायन्नामकीर्तयन् त्यजन्कलेवरंयोगीमुच्यतेकामकर्मभिः २३ सदेवदे
भगवान्प्रतीक्षतांकलेवरंयावदिदंहिनोम्यहं प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजोध्यानपथश्च
तुर्भुजः २४ सूतउवाच युधिष्ठिरस्तदाकर्ण्यशयानंशरपंजरे अपृच्छद्विविधान्धर्मानृषीणामनुशृ
ण्वताम् २५ श्रीकृष्ण० ॥ ० रामः

नैर्घिष्ठिंत्यनेकेवलंसोग्रतःस्थितःसन्मांप्रतीक्षतामित्यर्थः २४ ततस्तानुकंपवाक्यमाकर्ण्य २५ छ छ छ छ छ छ छ

पुरुषस्वभावेन विहितान् रजआदिसाधारणान् धर्मान् वर्णयामासेति तत्तो येनानन्वयः यथावर्णं वर्णधर्मान् यथाश्रमम् आश्रमधर्मांश्चैव वैराग्यरागाख्याभ्यामुपाधिभ्यां रूपेणाम्नातमुभयं नि-
वृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् २६ पुनस्तानेव विशेषेणाह दानेति मोक्षधर्मान् शमदमादीन् भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपान् समासव्यासेन संक्षेपसमासव्यासयोगेन सं-
क्षेपविस्तारेणाङ्गाङ्गियोगेन उपायो ततस्ताभ्यां २७ धर्मादींश्च यथाधिकारं प्रतिनियतोपायसहितान् यथावत् नानाख्यानेषु पृथगितिहासेषु यथासेतिन यावर्णयामास

पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् २६ दानधर्मान्राजधर्मान्मो-
क्षधर्मान्विभागशः स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः २७ धर्मार्थकाममोक्षांश्च सहोपाया-
न्यथा मुने नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् २८ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः यो योगि-
नश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः २९ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे कृष्णे लसत्पी-
तपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ३०

२८ छन्देनेच्छया मृत्युर्यस्य २९ सहस्रणीः सहस्रं रथिनो नयति परिपालयतीति सहस्रणीर्भीष्मः सह सिरोभिरिति पाठे सहस्रार्थवतीर्गिरः लसत्पीतपटो यस्य
तस्मिन् अमीलितदृगेव मनो व्यधारयत् ३० अनेन पवित्रया धारणया अपहतमशुभं यस्य सः तस्य श्रीकृष्णस्येक्षयैव रूपा हर्षेण गता अपध्वस्ता पापस्य सः अत एव निवृत्तः
सर्वेन्द्रियवृत्तीनां विभ्रमो विविधं भ्रमणं यस्मात् सः जनं देहं ३१ परमफलरूपां श्रीकृष्णस्य रतिं प्रार्थयितुं प्रथमं स्तुत्वा समर्पयति इति नानाधर्मोद्युक्तो पर्मतिः मनोधारणं लक्ष्य

णाउपकल्पितासमर्पिता ह्यसात्वतानां पुंगवे श्रेष्ठे भगवति वितृष्णा निष्कामा अवितृष्णेति वा छेदः अवितृष्णेत्यर्थः विगतो भूमा यस्मात्तस्मिन् प्रमेये स्वस्यापि ब्रह्म
त्वेनालीनत्वेन देवयस्मेश्वर्यमाह स्वसुखं स्वरूपभूतं परमानन्दमुपगते न्यायमवत्येव क्वचित् कदाचिद्विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति न तु स्वरूपतिरोधानेन
जीववत्पारतंत्र्यमित्यर्थः विहर्तुमित्युक्तं प्रपंचयति यद्यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति ३२ इदानीं श्रीकृष्णमूर्तिवर्णनपूर्वं रतिं प्रार्थयते त्रिभुवनक

विशुद्धया धारणया हताशुभस्तदीक्षयैवाशुगताऽपव्यथः निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनं
३१ भीष्म उवाच इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि स्वसुखमुपगते क्वचिद्विहर्तुं प्र
कृतिमुपेयुषि यद्भवप्रवाहः ३२ त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने वपुरलककुलावृता
ननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ३३

मनं त्रिलोक्यमेव कमनं कमनीयं तद्वपुर्दधाने रविकिरणगौरं निर्मलं कमनीयं श्वेतं वपुः तमालवत् नीलवर्णो यस्य तत् प्रातःकालीनार्ककिरणवत् गौरे पीते वरे निर्मले
अंबरे यस्मिंस्तत् अलककुलैरुपर्यावृतमाननाब्जं यस्मिंस्तत् विजयसखे पार्थसारथौ अनवद्या अहैतुकी फलाभिसंधिरहिता रतिरस्तु ३३ ३३

विजयसरित्वमेवानुवर्णायत्र निप्रार्थ्यते उधियुद्धे तुरगाणां खुररजसा धूम्रेण विक्षुब्धाक्षुसरांसिचवते विघ्नं धूसरं तलल क्षुलेतः कचाः कुंतलालोलेलुलितं विकी
र्णां श्रमवारि स्वेदबिंदु रूपं तेन भक्तवान्तस्मयोतकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे मम आत्मा मनो लग्नमस्तु मित्यर्थः पुनः किं भूते मम दीप्तैर्निशितैर स्त्रैः
शरैर्विभिद्यमाना त्वक् यस्य शरीरे रेव विलसत् कवचं यस्य तस्मिन् ३४ किं च सेपदीनां सेनयोरुभयोर्मध्ये रथं स्थाप्य पश्यैतानुत यावदेतान्निरीक्षेहं योद्ध

उधितुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ममनिशितशरैर्विभिद्यमानत्वचि विलसत्कवचेस्तुकृष्ण
आत्मा ३४ सपदिसखिवचोनिशम्यमध्येनिजपरयोर्बलयोरथंनिवेश्य स्थितवतिपरसैनिकायुरक्ष्णाहृतवति
पार्थसखेरतिर्ममास्तु ३५

कामानवस्थितान्निरीक्षे सख्युरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव स्वपरबलयोः सैन्ययोर्मध्ये स्थितिः पार्थसखे रतिरस्तु तत्र स्थित्वा कुरूंस्तान्पश्य दर्शयति पर
स्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति असौ भीष्मः असौ द्रोणः असौ कर्ण इति तर्जन्या दर्शनव्याजेन दृष्ट्यैव तेषामायुरक्ष्णा व्याजेन स्वज
नं परकृतवति ३५ न केवलमर्जुनस्य साम्पल्लावहरणेनैव जयप्राप्तावेव किं त्वविद्याहरणेनापि इत्याह स्ववहिनाद्धेरस्थिता यावत्ते नानसामा पुरवमध्यस्थितानभी

ष्यादित्तिष्ठेत्यर्थः स्वजनवधाद्विमुखस्य निवृत्तस्य तत्र गीतासंरवयमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमान
सः इति कुमतिमहरदात्मविद्यया ॥ ३६ ॥ मम तत्तमहं तत्र मनुष्यलेरुत्तवानित्यात् स्नाम्यं स्वनिगमं न शस्त्रग्रहणं मे वांहं सारथ्यमात्रं करिष्यामीत्येवं भूतं स्वमति
ज्ञां हित्वा भीष्मस्य शस्त्रं ग्राहयिष्यामीत्येवं रूपां मत्प्रतिज्ञां ऋतं सत्यं यथा भवति तथा अधिकं कर्तुं रथस्थः सन्नवप्लुतः सहसैवावतीर्णः सन्नयोभ्य

व्यवहितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुद्ध्या ॥ कुमतिमहरदात्मविद्ययायश्चरणरतिःपरमस्यतस्य
मेऽस्तु ॥ ३६ ॥ स्वनिगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः ॥ धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिवहंतुमिभं
गतोत्तरीयः ॥ ३७ ॥ श्रीकृष्ण०

याद्‌भिमुखमधावत् इभं हंतुं हरिः सिंह इव किं भूतः धृतो रथचरणः चक्रं येन सः तदा वेगेन रंभेणामानुष्यता पविस्पोते उदरस्थ सर्वभुवनभारेणाप्रतिपदे चलद्
गुः चलन्ती गौः पृथ्वी यस्मात् तेन वेगसंरंभेण पतितं उत्तरीयं वस्त्रं यस्य सः मुकुंदे ... तिभेवन्निन्युत्तरेणान्वयः ३७ ३७ ३७ ३७ ३७ ३७ ३७

एवं पद्भ्यां यानं दास्याम्यमानस्यानन्तरपि तो धन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्बाणैर्हतः अतो विशीर्णदंशः विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतः व्याप्तः सन् प्रसभं बलात्कार

यं तमर्जुनमप्यतिक्रम्य मद्वधार्थमभिससार अभिजगाम एवं यो लोके प्रतीत्यार्जुनपक्षपातित्वस्य भिन्नः बलात्कारमेवानुसरेकृतवान् स भगवान् मे गतिर्भवत्वित्यर्थः ३८ तदेव

मन्यापरविश्वत्परसाम्यत्र कृतेसेरतिमाशास्ते विजयोर्जुनस्तस्य रथ एव कुटुंबं स्वरक्षणीयं तस्मिन् स्वपरिक्षणीयो यस्य तस्मिन् आत्तं तोत्रं प्रतोदो येन तस्मिन् धृता हयानां रश्मयः

प्रग्रहा अर्जुनतेसेनिपस्य तस्मिन् वीक्ष्याद्भिप्सित्य न कारांतात् परिसिशद्धादिनिः तच्छ्रियात्यासारस्यश्रियाई क्षणीये शोभमाने मुमूर्षोर्मम गतिरस्तु भगवान्तुन्नापवीत्

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुंदः ३८ विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये भगवति गतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं ३९ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः कृतमनुकृतवत्य उन्मदांधाः प्रकृतिमगन्किल यस्य गोपवध्वः ४०

निकिमितिरतिं प्रार्थ्यते अत आह भगवति अधिविंस्यमूर्षे तदाह इह युद्धे हतास्तेऽर्जुयनिरीक्ष्य सरूपं तत्समानरूपं गताः प्राप्ताः इति दिव्यदृष्ट्या पदाय स्यात्राह ३९ सा

तद्धर्मेण युद्धमानानां सत्त्वरूपं प्राप्तिरित्येतत्त्वचित्रं यतो मदांधा अपि प्राप्तिरित्याह ललित गतिश्च विलासश्च हासादिभिं जगत्याद्भिभिः आत्मीयैर्वा कल्पितमुरुमानः इ

जायासां ताः अत उत्कटेन यदेनांधाः अत एव तदेकचित्तात्वेन तस्य कृतं कर्म गोवर्धनोद्धरणादिकं अनुकुर्वन्त्यो गोपवध्वः यस्य प्रकृतिं स्वरूपमगमन् गकारलो

पश्चार्षः किलप्रसिद्धं तस्मिन्मेरतिरस्त्विति शब्दैर्वाचान्वयः ४० जगतस्तत्पतामनुसरन्नाह मुनिगणेर्नृपवर्यसंकुलेध्यानेतः सदसि सभामध्ये युधिष्ठिरस्य राजसूय

राजसूयेऽस्य मुनिगणादीनामीक्षणीयः अहो त्वयमहो महिमेत्येवमाश्चर्येण विलोकनीयः सन् उपयेदेशाय एषजगतामात्माममदृष्टिगोचरः दृष्टिविषयः
सन् आविःप्रकटो वर्त्तते अहो मे भाग्यमिति भावः ४१ सोऽहं कृतार्थोऽस्मीत्याह तमिममजं सम्यगधिगतः प्राप्तोऽस्मि संपत्तिमाह तदर्थभेदस्योपाधिकमा

मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषां अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा
४१ तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूत
तभेदमोहः ४२ श्रीकृष्ण०

स्वात्मकल्पितानां स्वसंकल्पेन निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि स्थितिप्रतिहृदयं धिष्ठितं अधिष्ठितं अकारलोपश्छान्दसः नैकधा अनेकधा अधिष्ठानभेदाद्
नैकधाभांतमित्यर्थः अत्र दृष्टान्तः सर्वप्राणिनां दृशं दृशं प्रति एकमेवार्कमनेकधा प्रतीयमानमिवेति ४२ ४२ ४२ ४२ ४२ ४२

मनोवाग्दृष्टीनां वृत्तिभिः परमात्मनि श्रीकृष्णे अंतरेव लीनः श्वासो यस्य सः ४३ निष्कले निरुपाधौ संपद्यमानं मिलितमाज्ञाय आलक्ष्य ४४ देवैर्मानवैश्च वादिताः राज्ञां मध्ये साधवः शशंसुः ४५ निर्हरणादीनि संस्कारादीनि संपरेतस्य मृतस्यापीत्यन्वयः ४६ तुष्टुवुरिति ४७ पितरं धृतराष्ट्रं तपस्विनीं संतापवतीं ४८

सूतउवाच कृष्णएवंभगवतिमनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावेश्यसोंतःश्वासउपारमत् ४३ संपद्यमानमाज्ञायभीष्मंब्रह्मणिनिष्कले सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये ४४ तत्रदुंदुभयोनेदुर्देवमानववादिताः शशंसुःसाधवोराज्ञां खात्पेतुःपुष्पवृष्टयः ४५ तस्यनिर्हरणादीनिसंपरेतस्यभार्गव युधिष्ठिरःकारयित्वामुहूर्तंदुःखितोभवत् ४६ तुष्टुवुर्मुनयोहृष्टाः कृष्णंतद्गुह्यनामभिः ततस्तेकृष्णहृदयाःस्वाश्रमान्प्रययुःपुनः ४७ ततोयुधिष्ठिरोगत्वासहकृष्णोगजाह्वयं पितरंसांत्वयामासगांधारींचतपस्विनीं ४८ पित्राचानुमतोराजावासुदेवानुमोदितः चकारराज्यंधर्मेणपितृपैतामहंविभुः ४९ इतिप्रथमेनवमः ९ शौनकउवाच हत्वास्वरिक्थस्पृधआततायिनोयुधिष्ठिरोधर्मभृतांवरिष्ठः सहानुजैःप्रत्यवरुद्धभोजनःकथंप्रवृत्तःकिमकार्षीत्ततः १

राजायुधिष्ठिरः ४९ इतिप्रथमेनवमः ९ दशमेकृतकार्यस्यहरिणापुरतोहरेः स्त्रीभिःसंस्तूयमानस्यवर्ण्यतेद्वारकागमः राज्यंचकारेत्युक्तंतत्रपृच्छतिहत्वेति रिक्थंधनंस्पर्द्धंतेस्पृधंतेनया। पद्य। स्वरिक्थायस्पृधंतेसंग्रामेयेपितापायन्तएवधनादिहरणादाततायिनः तान्हत्वाप्रत्यवरुद्धभोजनः वंधुवधदुःखेनसंकुचितभोगःराज्यंत्ता

अमात्यामंत्रिणोदूताश्रेणयश्चपुरोहिताः।पुरंजनश्चएतेस्तिससप्तप्रणिधयःस्मृताइतिपाद्मे॥१॥

भेनमामसभोगेनावाकथंराज्येप्रवृत्तःप्रवृत्तोवाततःकिमकार्षीत् १ राज्यप्रवृत्तोश्रीकृष्णसमीतिंपर्यालोच्यप्रवृत्तइत्याशयेनोत्तरमाह वंशंकुरोःसंरोहयित्वापरीक्षिद्रूप रोणसंरोह्यअंकुरितंकृत्वा कथंभूतंवंशदवाग्निनिर्हृतंवंशएवदवोवनंतस्मादुद्भूतःक्रोधःसएवाग्निस्तेननिर्हृतंदग्धंनिजराज्येनिवेश्यच २ प्रवृत्तोऽपिहितपुरुषंकिमकरो

सूतउवाच वंशंकुरोर्वंशदवाग्निनिर्हृतंसंरोहयित्वाभवभावनोहरिः निवेशयित्वानिजराज्यईश्वरोयुधिष्ठिरं प्रीतमनाबभूवह २ निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृत्तविज्ञानविधूतविभ्रमः शशासगामिंद्रइवाजिताश्रयःपरिध्युपांतामनुजानुवर्तितः ३

पाठांतर स्वाणि-
धुपांतामिति-
तदर्थश्चामात्या
दिसप्तप्रणिधि-
भिरुपांतांप्राप्ता
मितिभागवततात्
पर्येउक्तं

भूमींदिश्यस्योत्तरमाह निशम्येति भवृतंपदिष्टानंपरमेश्वराधीनंजगन्नस्वतंत्रमित्येवंभूतंतेनविधूतोविभ्रमोअहंकारोयस्यैवंभूतोमोहोयस्यसः अनुजैरनुवर्तितःसे वितःसन्अजितःश्रीकृष्णएवआश्रयोयस्यसःपरिधिःसमुद्रःतत्पर्यंतांगांपृथ्वींपालयामास ३ ३ ३ ३ ३ ३ ३ ३ ३ ३

तस्य राज्यमनुवर्णयति काममिति त्रिभिः महीसर्वकामदोग्ध्रीव बभूव प्रजानयोग्यानि ऊधस्वतीः ऊधस्वत्यः ऊधः क्षीराशयः स्थूलो यासां इत्यर्थः शिषिचुः अभ्यषिंचन् ४
अन्वृतु ऋतावृतौ ५ आधयो मनोव्यथाः व्याधयो रोगाः क्लेशाः शीतोष्मादिकृताः दैवं च भूतगणानि च आत्मा च देहस्तु येषां आधिदैविकादीनां ते जंतूनां नाभवन् ६

कामं ववर्ष पर्जन्यः सर्वकामदुघा मही शिषिचुः स्म व्रजान्गावः पयसोधस्वतीर्मुदा ४ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः
फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ५ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः अजातशत्रावभवन्जंतूनां राज्ञि कर्हि
चित् ६ उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ७ आमंत्र्य चाभ्यनुज्ञा
तः परिष्वज्याभिवाद्य तं आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ८ सुभद्रा द्रौपदी कुंती विराटतनया तथा गांधारी धृ
तराष्ट्रश्च युयुत्सुर्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः १०
सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः सहेर
न्विरहं कथं ॥ ०

इदानीं द्वारकागमनं निरूपयिष्यन्नाह उषित्वेति स्वसुः सुभद्रायाः ७ तं युधिष्ठिरं ८ युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः गौतमः कृपः यमौ नकुलसहदेवौ ९ अन्याः
स्त्रियः मत्स्यसुता उत्तरा तस्याः पुनर्ग्रहणं गर्भरक्षकत्वेन विरहमोहाधिक्यात् यद्वा मत्स्यसुता सत्यवती १० तेषां कस्माद्विरहसहनं कैमुतिकन्यायेनाह सत्संगादिति

द्वाभ्यां सन्तोषवेगाद्धेतोर्मुक्तः पत्राद्दिव्ययोद्गः संयोगिनमः सद्भिः कीर्त्यमानं तु विकारं पश्यपशः सकृद्व्याकार्ये सततं गंतव्यं कुलन शक्नेति ११ दर्शनादिभिस्तस्मिन्नस्वीकृ
सैन्यलाधीर्येषांते १२ अतएव निमिषैर्नेत्रैस्तमेव वीक्ष्यमाणास्तत्र तत्राहं स्थान पनार्थं चलतिस्म पतः स्त्रैरैः नसत्यमवद्धाः अतएव तमनुगत निवेतां

दर्शनस्पर्शनालापश्रवणासनभोजनैः १२ सर्वे ते निमिषैरक्षैस्तमनुद्रुतचेतसः वीक्ष्यंतस्त्वेहसं वद्धाविचेलु
लुलात्रतत्र ह १३ न्यपतंश्च धनुर्दलद्ध्याध्यमौलेः त्याद्देवकीसुते निर्याप्यगाराणित्रोभद्रमितिस्वाद्धान्धवस्त्रियः
१४ मृदंगशंखभेर्यश्चवीणापणवगोमुखाः धुंधुर्यानकघंटाद्यानेदुर्दुंदुभयस्तदा १५ प्रासादशिखरारू
ढाः कुरुनार्यो दिदृक्षया ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः १६ १६ १६ १६ १६
श्रीकृष्णः १६ श्रीकृष्णः०

स्त्रियेषांते १३ अगाराद्स्त्रियो निर्गच्छन्ति सति श्रौत्काव्याद्विगो उद्गलात्स्रवत्बाष्पतयाअनुत्सुत्वं चैव चलं भितवाय तत्र हेतुः अभद्रं वोस्यात् अभंगल
मास्थ्दिनेपेतदर्थे १४ मृदंगादयो द्राद्यभेदाः १५ प्रेमव्रीडास्मितत्र सर्वे वीक्षणं यासांताः १६ १६ १६ १६ १६ १६ १६

गुडाकानिद्रातस्याः ईशो जितनिद्रोर्जुनः १७ व्यजनेचामरेरेजरराजमधुपतिः श्रीकृष्णः १८ सत्याः श्रीकृष्णस्यैतासामयथिचारान किंतु नानुरूपाश्च ता अनुरूपाश्च निर्गुणस्य
परमानंदस्यसुखीभवेत्याद्योनानुरूपाः गुणात्मनो मानुष्यनामावतारे अनुरूपा इत्यर्थः संभितार्थः १९ सर्वासां श्रुतीनां मनोहरः उपनिषदोपिमन्तेः तं जल्पमभ्यन
दन्नित्यर्थः २० तत्रैतेजः सौंदर्याद्यतिशयेनविस्मितास्यः सखीभ्यो न्याः स्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति सवाइति चतुर्भिः वैस्मर
णे किलेतिप्रसिद्धप्रमाणद्योतनं यएकएवाद्वितीयः पुरुष आसीत्स एवायं श्रीकृष्णः कुत्रासीत् अविशेषआत्मनिनिष्प्रपंचे निजरूपे कदा अग्रे गुणेभ्यो गुणक्षो

सितातपत्रजयाहमुक्तादामविभूषिते रत्नदंडं गडाकेशः प्रियः प्रियतमस्य हि १७ उद्धवस्तात्पकिं श्चैवव्यजनेनपरमाद्भुतेवि
कीर्यमाणः कुसुमैरेजेमधुपतिः पथि १८ अश्रूयंताशिषस्तत्यात्तत्र तत्र द्विजेरिताः नानुरूपानुरूपाश्चनिर्गुणस्य
गुणात्मनः १९ अन्योन्यमासीत्संजल्पउत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणांसर्वश्रुतिमनोहरः २० सवैकिलायंपु
रुषः पुरातनोयएकआसीदविशेषआत्मनि अग्रेगुणेभ्योजगदात्मनीश्वरे निमीलितात्मन्निशिसुप्तशक्तिषु २१

भात्पूर्वं तथानिशिप्रलयेपचनस्यलक्षणं जगतां आत्मनि जीवे निमीलितात्मन्निति लुप्तसप्तम्यंतंपदं जातावेकवचनं ईश्वरेलीनत्वेषुजीवेषुसत्स्वित्यर्थः ननु
जीवानांप्रलयानात्कथंलयपदं तत्राह सुप्तासुशक्तिषुसतीषु जीवोपाधिभूतसत्त्वादिशक्तिलयएवजीवलयइत्यर्थः २१ तदेवंस्वरूपेणदीप्रलयानंतरं च नि चूर्णपंचाव
स्थानमुक्तास्थिमलयपोर्मध्ये सप्रपंचावस्थानमाह सएव अप्रच्युतस्वरूपस्थितेरेव प्रकृतिमनुसंसारमधिष्ठितवान् भूयः पुनः सृष्टिप्रवाहस्यानादित्वात की

भा०प्र०
५०

दृशीं निजवीर्यचोदितां स्वकालशक्तिप्रेरितां शब्दभूतानां जीवानां मायां मोहिनीं अत एव सिसृक्षंतीं स्रष्टुमिच्छंतीं किमर्थमनुससार अनामरूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् उपाधिलक्षणा जीवानां भोगा इत्यर्थः कर्माणि च विधातुं वेदान् कृतवानित्याहुः शास्त्रकृदिति २२ अस्य दर्शनमतिदुर्लभमस्मा भिर्लेध्यमित्याहुः सवै अयं यस्य पदं स्वरूपं अक्षिभिर्वा निर्जितो मातरिश्वा प्राणो यैः सूरयस्तत्वमार्गवेत्तारः स्वरूप एव पश्यंति केन भक्त्या उत्कलित उत्कंठितोमलोय

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं अनामरूपात्मनि रूपनामनी विधित्समानोनुससार शास्त्रकृत् २२ स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः पश्यंति भक्त्युत्कलितामलात्मना नन्वेष सत्वं परिमार्ष्टुमर्हति २३

आत्मा बुद्धिस्तेन दृश्यते त्वग्र्यया बुद्ध्येति श्रुतेः बुद्धिर्वैमल्यस्याप्ययमेव हेतुरित्याहुः ननु हे सखि एष एव सत्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्हति ननु योग्याद इत्यर्थः यद्वा नु अहो एष सत्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेनाप्रत्यक्षीभवितुं नार्हति किं त्वनेन सहैव गंतव्यमित्यार्थः २३ लितामलात्मनानन्वेष सत्वं परि मार्ष्टुमर्हति २३ श्रीकृष्ण०

राम०
५०

आर्यश्लोकत्वमाह हे सखि यो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैः अनुगीतसत्कथ अनुगीताः सत्यः कथा यस्य स एवायं गायन्कस्मात् य एक ईश स्मादि २४ एवं भजनस्य
नानावतारकारणमाह यदाहीति तमोध्यामाधीर्येषां ते नृपा अधर्मेण जीवन्ति केवलं प्राणान्पुष्णन्ति तत्र तदा एष एव भवाय स्थित्यै सत्त्वतः विशुद्धरूपेण सत्त्वेन रूपाणि
दधद्गुणादीनि धत्ते प्रकटयति युगे युगे तत्तदवसरे भगमैश्वर्यं सत्यं सत्यसन्धत्वं ऋतं यथार्थोपदेशकत्वं दयां भक्तानुकम्पां यशः अद्भुतकर्मत्वं २५ विशेषतः श्रीकृष्णा

स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते २४ यदा
ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे २५ अहो
अलं श्लाघ्यतमं यदोः कुलमहो अलं पुण्यतमं मधोर्वनं यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चङ्क्रमणेन चाञ्चति
२६ अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः पश्यन्ति नित्यं यदनुग्रहेषितं स्मितावलोकं
स्वपतिं स्म यत्प्रजाः २७

वतारैः सौभाग्यं वर्णयन्ति अहो इति पञ्चभिः यद्यस्मात् एष पुंसामृषभः श्रियः पतिः स्वजन्मना यदोः कुलं अञ्चति सभाजयति अतः श्लाघ्यतमं तत्र चङ्क्रमणेन च मधोर्वनं
मथुरां सनाथं करोति अतः अलं पुण्यतममिति तमबर्थे श्लाघ्यत्वातिशये अलमिति तत्राप्याश्चर्यमहो इत्युक्तं २६ अहो बत आश्चर्ये किं तत् कुशस्थली द्वारका स्वर्ग उ
त्कृष्ट इति यत् यशस्तस्यापि तिरस्करी परिभवकर्त्री भवति यद्यतः यत्प्रजाः यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेणेषितं स्मितसर्वावलोकं यद्वा अनुग्रहार्थमिषितं स्वं स्व

भा०प्र० स्वात्मनः पतिंश्रीकृष्णं ननुपित्रादिवंद्देहमात्रंयपतिंनित्यंपश्यंतिसाउषितमितियदिस्वानुग्रहार्थमुषितंकृतनिवासंतेनतत्स्वर्गेस्थोन्यर्थः २७ हेसखिअस्यगृहीत
५९ पाणिभिःपत्नीभिःईश्वरोयमेवव्रतंजन्मांतरेषुसमर्चितःयस्मिन्अधरामृतेआशयश्चित्तंयासांताः संमोहंप्राप्ताः इतिमनोहरत्वमुक्तं २८ एतत्प्रसंगंचयंचयतिद्वाभ्यांवीर्य

नूनंव्रतस्नानहुतादिनेश्वरस्समर्चितोह्यस्यगृहीतपाणिभिः पिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रियस्संमुमुहुर्यदाशयाः
२८ यावीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः प्रद्युम्नसांबांबसुतादयोपराःयाश्चाहृताःभौमवधे
सहस्रशः २९ श्रीकृष्ण०

प्रभावमेवशुल्कंमौल्यंतेन शुष्मिणःबलिष्ठान् प्रद्युम्नःसांबश्चांबश्चांबश्चसुतायासांतुविभणीजांबवतिनाग्नजितीनांताअदियासांसत्यभामादीनांताः याश्चापराः
अस्यश्लोकस्योत्तरश्लोकेनान्वयः ९९

रामं०
५९

एतास्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते अयातं गतं येशलं भद्रं स्वातंत्र्यं यस्मात् निरस्तं शौचं शुचित्वं यस्मात् यो भर्तृतमपि जातु कदाचिदपि नापैति न निर्गच्छति आह
तमिर्थाहारैः पद्मपारिजातादिप्रियवस्त्वाहरणैः हृदि स्पृशन्नानंदयन् ३० एवंविधा स्त्रियो गिरस्तस्मितेन निरीक्षणेनाभिनंदन् हरिर्ययौ ३१ मधुद्विषोपि गोपीथा

ते

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वेने यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ३०
एवंविधा गदंतीनां स गिरः पुरयोषितां निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ३१ अजातशत्रुः पृतनां गोपीथाय मधुद्वि
षः परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं ३२ अथ दूरागतान् शौरिः कौरवान्विरहातुरान् सन्निवर्त्य दृढं स्निग्धान्प्राया
त्स्वनगरीं प्रियैः ३३ कुरुजांगलपांचालान्शूरसेनान्सयामुनान् ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ३४ मरु
धन्वमतिक्रम्य सौवीराभीरयोः परान् आनर्तान्भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ३५ श्री श्री श्री श्री
श्रीकृष्णः ॥ श्रीकृष्णः

परक्षणाय स्नेहात्परेभ्यः शंकितः सन्प्रायुंक्त हस्त्यश्वरथपादातसेनांगं यस्याश्चतुर्विधमित्येवं चतुरंगिणीं पृतनां सेनां ३२ पांडवेभ्यः कुरुवंशजत्वात्पांडवा अपि कौरवा एव तान्प्रियैः उ
द्धवादिभिः सह ३३ कुरुक्षेत्रं कुरुदेशं तदग्रगमनमेव कर्मोत्तनविवक्षितः ३४ मरुर्निरुदको देशः धन्वोल्पोदकः आनर्ताख्यो द्वारकादेशः स विभुः उपागमत्प्राप्त इ

भार्गवमनाकृष्यंतस्त्रांतावाहाः पुरस्सः २५ तत्रतत्र देशेतत्रत्यैर्जनैः प्रत्युद्यतानिवेदितानि अर्हणानि उपायापयनानि प्रस्ताः सायं प्रयाणं हिपश्चाद्दिशंपश्चि
मांदिशं भेजे प्राग्गलदागविष्टः स्वर्गस्य सूर्यः गामुदंकागतः प्रविष्टः अस्तंगतइत्यर्थः अद्ध्वावाएवमानतुदेत्याय सावंभविशतीतिश्रुते मह्वा तदासायंकाले
जातिरथ्यादवतीर्णगविष्टः भूमोस्थितः गोलं जलाशयगतः सनपश्चात्दिशं संध्यांभेजे उपासितवानित्यर्थः २६ इतिश्रीभागवतेप्रथमस्कंधेदशमोध्यायः १०

तत्रतत्रहितत्रत्यैर्हरिः प्रत्युद्यताहरणाः सायंभेजेदिशंपश्चाद्दविष्टोगांगतस्तदा २६ इतिश्रीमहापुराणेप्रथम
स्कंधेश्रीकृष्णद्वारिकागमनोनामदशमोध्यायः १० सूतउवाच आनर्तान्सउपव्रज्यस्वृद्धाञ्जनपदान्स्वकान्
न दध्मौदरवरंतेषांदंशमयन्निव १

विषा

आनर्तैः सूयमानस्यशेनिर्विश्यवंधुभिः एकादशेरतिः सम्प्रगषादवेंद्रस्यवर्ण्यते उत्सवेनुच्चलत्पौरमुदंचनध्वजतोरणं उद्भसद्दलदीपालिस्वपरंप्रभुणा
विशतस्तद्वान् दरवंरंयावजन्नंशांखंदध्मौनादितवान् १

दरः शंखः उच्चकाशि शुशुभे धवलमुदरं यस्य सः उरुक्रमस्याधरस्य यः शोणस्तेन शोणिमा यस्य सः कथम् यथा करकाशे अब्जखंडे रक्तकमलसमूहे कलहंस उच्चशब्दो यथा तद्वत् २ जगद्भयं यत् भयं तस्यापि भयावहं प्रत्युद्ययुः प्रत्युज्जग्मुः भर्तृदर्शने लालसा औत्सुक्यं यासां ताः ३ तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिताः बलयः उपायनानि याभिस्ताः निरपेक्षेपि तस्मिन्नादरेण समर्पणे दृष्टांतः रवेर्दीपमिवेति पितरमर्भका इव तं सर्वसुहृदमवितारं चुरित्युत्तरेणान्वयः ५ सुहृत्त्वेनैवावितारं न तु कामेन यत्र हेतुः आत्मारामं ते

स उच्चकाशे धवलोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः २ तमुपश्रुत्य निनदं जगद्भयभयावहम् प्रत्युद्ययुः प्रजाः सर्वाः भर्तृदर्शनलालसाः ३ तत्रोपनीतबलयो रवेर्दीपमिवादृताः आत्मारामं पूर्णकामं निजलाभेन नित्यदा ४ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा पितरं सर्वसुहृदमवितारमिवार्भकाः ५ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितम् परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ६ भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ७

त्रापि हेतुः परमानंदनिजस्वरूपलाभेनैव पूर्णकामं ५ किमूचुरित्याह नताः स्म इति विरिंचो ब्रह्मा वैरिंच्याः सनकादयः इह संसारे परं क्षेममिच्छतां परायणं परमेश्वर संकृतः एतेषां ब्रह्मादीनामपि प्रभुरपि कालो यत्र प्रभुर्न भवेत् ६ अतो भवाय उद्भवाय नोऽस्माकं त्वं भव हे विश्वभावन कृतिनः कृतार्था बभूविम जाता वयम् ७ कृतार्थत्वमेवाहुः स्नेहो भवतो वयं सनाथाः स्मः यद्यस्मात् नवरूपं पश्येम त्रैविष्टपानामपि देवानां हरेर्दर्शनं पश्यता तद्देवानामपि दुर्लभमित्यर्थः प्रेमगा यत्तस्मितेन तद्युतं तं स्निग्धेनि

रीक्षणेनत्वदाननंयस्मिन्ताहृशं सर्वस्वैस्वु अंगेषुसौभगं यस्मिन् ८ अमकाश्वस्तकउणमाहुः यर्हि यदामो अंबुजाक्षनोभवानितियाठेनश्त्यनादरे षष्ठीअस्मान नादृत्य अयसखा स्वंयहाय जगामकुरून्हस्तिनापुरं मधून्मथुरांवातत्रतदारविंविनाश्रांधादक्षणोर्यथा एवंतवनःत्वदीयानामस्माकमयोन्यर्थः ९ इतित्र

यद्

अहोसनाथाभवनार्स्मयंत्रैविष्टपानामपिहूरदर्शनम्प्रेमस्मितस्निग्धनिरीक्षणाननंयश्येमरूपंतवसर्वसौभगम् ८ ययंबुजाक्षायसखारभो भवान्कुरून्मधून्वाथसुहृद्दिहृक्षया तत्राब्दकोटिमतिमःक्षणोभवद्रविंविनाक्ष्णोरिवन स्तवाच्युत ९ इतिचोदीरितावाचःप्रजानांभक्तवत्सलः शृण्वानोनुग्रहंदृष्ट्यावितन्वन्याविशत्पुरीम् १०
श्रीकृष्ण १० श्रीकृष्णः०

एवंविधाअन्याश्चोच्चारितावाचःशृण्वन्दृष्ट्यामाभिनंदनावलोकनेनानुग्रहंकुर्वन्पुरींद्वारकांप्राविशत् १० . १० १० १० १० १० १०

मन्दारकाद्यैरेतैः पंचभिः स्वतुल्यबलैः मधुभोजादिभिर्गुप्तां रक्षितां ११ सर्वर्तुषु सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षा लताश्रमा लतामण्डपा यास्तैर्युतैः उद्यानादिभिर्वृतोपेय पद्माकराः सरांसि तैः श्रीः शोभा यस्यास्तां उद्यानं फलप्रधानं उपवनं पुष्पप्रधानम् आरामः क्रीडार्थं वनं १२ गोपुरं पुरद्वारं द्वारं गृहद्वारं कृतानि कौतुकं

मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ११ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः उद्यानोपवनारामैर्वृतपद्माकरश्रियम् १२ गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम् १३ सम्मार्जितमहामार्गरथ्यापणकचत्वराम् सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः १४ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः अलंकृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः १५ निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः १६

मङ्गलेन उत्सवेन तोरणानि यस्यां ताम् गरुडादिचिह्नाङ्किताः ध्वजाः जयमङ्गलयन्त्राङ्किताः पताकाः चित्राणां ध्वजपताकानामग्रैः अन्तः प्रतिहत आतपो यस्याम् १३ सम्मार्जितानि निःसारितरजस्कानि महामार्गादीनि यस्यां महामार्गो राजमार्गः रथ्या इतरमार्गः आपणकाः पण्यवीथयः चत्वराणि अङ्गनानि फलादिभिः उप्तामवकीर्णां १४

भा० प्र०
५४

द्वारीति १५ प्रेष्ठमंजरामानं प्रायांतं निशम्य श्रुत्वा वसुदेवादयः सन्तुष्टा आसुरिति चतुर्थेनान्वयः १६ प्रहर्षवेगेन उच्छसितानि उद्घंघितानि शयनासनादीनि
यैः शशत्पुत्रयन्तौ १७ वारणेंद्रं मंगलार्थं पुरतः कृत्वा ससुमंगलैः सुमंगलपुष्पादि दधिपाणिभिः ब्रह्मघोषो मंत्रपाठः प्रणयेन स्नेहेन प्रागंसाध्वसं संभ्रमो ये

प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः १७ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः स
सुमंगलैः शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः १८ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः वारमुख्या
श्च शतशो यानैस्तद्दर्शनोत्सुकाः लसत्कुंडलनिर्भातकपोलवदनश्रियः १९ श्रीकृष्ण० ॥ छ छ
श्रीकृष्ण० छ श्रीकृष्णः०

ये। १८ वारमुख्या नटादयश्च प्रत्युज्जग्मुः चकुं तानि चेति चकारस्त्वर्थे दिनश्चेत्यन्वयः लसत्कुंडलैर्निर्भातानि यानि कपोलानि तैर्वदनेषु श्रीर्यासां ताः वारमु
ख्याः नर्तक्यो वेश्याः १९

राम०
५४

नटानवरसाभिनयचतुराः तालाद्यनुसारेण नृत्यंतोनर्तकाः गंधर्वागायकाः सूताः पौराणिकाः प्रोक्तामागधावंशशंसकाः वंदिनस्तस्मलक्षणतामप्रलावसदृशोगायंति सर्वेगायंतिचेतिगायंतिस्मचेतिचकारस्यान्वयः २० यथाविधिर्येःसहयथोचितंतैस्तथासमागम्यसर्वेषांमानंदत्तवानित्यर्थः २१ तदाहप्रह्वेति प्रह्वत्वंशिरसानतिः अभिवादनंवाचानतिः आश्वास्यश्वपचपर्यंतानभिमतैर्वरैःअभीष्टदानेनसंमानंकृतवान् २२ अन्यैश्चवंदिभिश्च २३ तस्येक्षणेनोमहानुत्सवोयासां २४

नटनर्तकगंधर्वाःसूतमागधवंदिनः गायंतिचोत्तमश्लोकचरितान्यद्भुतानिच २० भगवांस्तत्रबंधूनांपौराणामनुवर्तिनां यथाविध्युपसंगम्यसर्वेषांमानमादधे २१ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः आश्वास्यचाश्वपाकेभ्योवरैश्चाभिमतैर्विभुः २२ स्वयंचगुरुभिर्विप्रैःसदारैःस्थविरैरपि आशीर्भिर्युज्यमानोन्यैर्वंदिभिश्चाविशत्पुरं २३ राजमार्गंगतेकृष्णेद्वारकायाःकुलस्त्रियः हर्म्याण्यारुरुहुर्विप्रतदीक्षणमहोत्सवाः २४ नित्यंनिरीक्षमाणानांयदपिद्वारकौकसां नवितृप्यंतिहिदृशःश्रियोधामांगमच्युतं २५ श्रियोनिवासोयस्योरःपानपात्रंमुखंदृशां बाहवोलोकपालानांसारंगाणांपदांबुजं २६

यद्यस्मात्तत्पंसदाअच्युतंनिरीक्ष्यमाणानामपिदृशोनैववितृप्यंतितत्रहेतुरुरुहुःकथंभूतं श्रियःशोभायाधामस्थानमंगंयस्यतं २५ एतदेवाभिनयेनाह श्रियोलक्ष्म्यायस्योरःवक्षःनिवासःयस्यमुखंसर्वप्राणिनांदृशांसौंदर्यामृतपानायपात्रं यस्यबाहवोलोकपालानांनिवासाःसारंग्याःयंतीतिसारंगाभक्तास्तेषांयस्यपदांबुजंनिवासःतत्निरीक्ष्यमाणानांदृशइतिपूर्वेणान्वयः २६ सितैरा तपत्रव्यजनैश्चउपस्कृतोमंडितः अर्कश्चउडुपोनक्षत्रसहितश्चंद्रश्च चापमिंद्रधनुश्चैवैर्युतंविद्युतेजस्तैः ॥

श्यर्कः छत्रस्योपमानं नक्षत्राणि उपग्रहरूक्षे चंद्रः परिभ्रमरूपमंडलाकारयोश्चामरव्यजनयोः चापवनमालायाः विद्युत्तेजः पिशंगवाससोः मभतो
यमेयं यदि घनस्योपरिस्थये विंबं उभयतश्चंद्रो सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं मिश्रितं चापद्वयं स्थिरं विद्युत्तेजो यदि भवेत्तर्हि सघनोपया

चाप

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः
२७ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ववंदे शिरसा सप्त देवकीप्रमुखाः स्त्रियः २८ ताः पुत्रमंकमा
रोप्य स्नेहस्नुतपयोधराः हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः २९ २९ २९ २९

भाति तथा हरिर्बभावित्यर्थः २७ देवकीप्रमुखाः सप्त ववंद इति मातृस्यो देवक्या आदरविशेषज्ञापनार्थमुक्तं श्रष्टादश यद्यपि पितुर्वसुदेवस्य भार्या मातृत्वेन ता
न्नमस्कृता एव २८ २९ श्रीरुस०

सत्स्वामिताचयोः ३ शोभितचकाराद्घोतरशताधिकानीति ज्ञेयं ३० प्रोष्य देशांतरे उषिता आगाद् दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः आसनादाशयाच्च आस
नादेहेन उत्तस्थुः आशयोऽन्तःकरणात्तस्मादप्युत्तस्थुः श्रीकृष्णेनात्मनः संश्लेषे अंतःकरणाच्च व्यवधानमपि नासहंतेत्यर्थः व्रीडितानि लोचनानि आननानि च यासां
अपांगैरेव वीक्षणात् व्रीडितलोचनाः अवनतमुखत्वात् व्रीडिताननाः साकं व्रतैरिति रहस्यक्रीडावर्जनादिनियमा अपि ताः प्युत्तस्थुरित्यर्थः व्रतमूल्यात्प्रत्युत्तस्थुरि
ति वा व्रतानि च यास्त्वत्कृतो नामानि क्रीडाशरीरसंस्कारसमाजोत्सवदर्शनेहास्य परगृहेयानेत्यजेन्प्रोषितभर्तृकेति ३१ आयांतं पत्युर्दर्शनात्स्वेमात्मवाउद्राप

अथाविशत्स्वभवनं सर्वकाममनुत्तमं । प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलो
क्य संजातमनोमहोत्सवाः । उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥ तमात्मजैर्दृष्टिभिरन्तरात्मना
दुरन्तभावाः परिरेभिरे पतिं । निरुद्धमप्यास्रवदम्बु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ॥ ३२ ॥ यद्यप्यसौ पार्श्वगतो रहोग
तस्तथापि तस्यांघ्रियुगं नवं नवं । पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥ ३३ ॥ ३३ ३३

परिरेभिरे तत्रोदृष्टिभिः ततः समीपमागत आत्मजैः पुत्रैर्गृहीतकं रमालिंगयंत्यः स्वस्वपत्युरालिंगितवत्य इत्यर्थः तत्र हेतुः दुरंतभावाः गंभीराभिप्रायाः तदा च तासां नि
त्रयोर्निरुद्धमप्यंबु वाष्पं क्लैव्याद्दैन्याद्दैवस्यात् अस्रवत्सुस्राव अत एव धैर्यहान्या विलज्जतीनां हे भृगुवर्य चित्रं पश्यैवेति ३२ पार्श्वगतः समीपस्थः तत्रापि रहोगतः ए
कांतेस्य पदे पदे प्रतिक्षणं नवनवमेव अस्य त्वंघ्रियुग्मं यस्याः का विरमेतेति चलापि चलस्वभावापि ३३ अथ श्रीकृष्णसंचरितेसौ अस्मिन्प्यासेवमिति द्वाभ्यां हिंसेभार्याएषजन्म

भा०प्र०
५६

प्रेषां अक्षौहिणीभिः कृत्वापरिवृत्तंसर्वतःप्रसृतंतेजःप्रभावोयेषां श्वसनोवायुर्वेणूनामन्योन्यसंघर्षेणानलंविधायमिथोदाहेनयथोपशाम्यतितद्वत् ३४
स्त्रीरत्नकूटस्थउत्तमस्त्रीकदंबस्थः ३५ नन्वेवंस्त्रीसंगादिभिःसंसारित्वेतेकथंभगवाननवतीर्णइत्युच्यते तत्राह उद्दामेतिद्वाभ्यांयासांउद्दामोगंभीरो

एवंनृपाणांक्षितिभारजन्मनामक्षौहिणीभिःपरिवृत्ततेजसां विधायवैरंश्वसनोयथानलंमिथोवधेनोपरतो
निरायुधः ३४ सएषनरलोकेस्मिन्नवतीर्णःस्वमायया रेमेस्त्रीरत्नकूटस्थोभगवान्प्राकृतोयथा ३५
उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतोमदनोपियासां सम्मुह्यचापमजहात्प्रमदोत्तमास्ताय
स्येंद्रियंविमथितुंकुहकैर्नशेकुः ३६

योभावोभिप्रायःतस्यपिशुनःसूचकोमलोवल्गुःसुंदरोहासोव्रीडावलोकश्चताभ्यांनिहतःअमदनःश्रीमहादेवोपिसंमुह्यलज्जयाचापंपिनाकमजहात् एवं
प्रभाव्यपाःस्त्रियइत्येतावदेववक्षिते यद्वाभगवतोमोहिनीरूपेणमदेशोपिमोहितःएवंताःस्वगात्रदृग्विलासैरेवेतिता योषितःकुहकैःकपटैर्विभ्रमैर्यस्ये
द्रियंमनःविमथितुंक्षोभयितुंनशेकुः ३६

राम०
५६

तं श्रीकृष्णं अयं प्राकृतो लोकः आत्मौपम्येन स्वसादृश्येन संगिनं मनुजं मन्यते अत्र हेतुः व्यापृण्वानं व्याप्रियमाणं अतो यतः अबुधः ३७ कुत इत्यपेक्षायामैश्वर्यलक्षणमाह एतदिति ईशस्येशनमैश्वर्यं नाम एतदेव किं तत् प्रकृतिस्थोऽपि तत्स्थगुणैः सुखदुःखादिभिः संबध्यते इति यत् यथात्मस्थैः आनंदादिभिः आत्माश्रयापि बुद्धिर्न युज्यते तद्वत् वैधर्म्ये दृष्टांतो वा आत्मस्थैः सत्यप्रकाशादिभिर्यथा बुद्धिर्युज्यते इति एवं वा असदात्मादेः तत्रैश्वर्यगुणैस्तदाश्रयापि बुद्धिर्लद

तमयं मन्यते लोको ह्यसंगमपि संगिनं आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ३७ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ३८ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ३९ इति श्रीभा० पारीक्षिते श्रीकृष्णसमागमो नामैकादशोऽध्यायः ११ शौनक उवाच अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा उत्तराया हतो गर्भ ईशेनाजीवितः पुनः १ श्रीकृष्णः० ॥ छ छ छ

स्क

यापि जीवोपाधिर्यथा युज्यते एवं प्रकृतिस्थोऽपि न तद्गुणैर्युज्यत इति पदे तदीशनमीशस्येति ३८ तत्पत्न्योऽपि तत्स्वरूपं न जानंतीत्याह तं स्त्रैणं आत्मवशं परतः एकांते अनुव्रतं अनुरक्तं च मेनिरे भर्तुः प्रमाणाविदः प्रमाणमियत्तां महिमानं अजानंत्य इत्यर्थः ईश्वरं क्षेत्रज्ञं मतयः अहंवृत्तयो यथा आत्माधीनं स्वधर्मयोगिनं मन्यंते तद्वत् यद्वा यथा यथा नास्तिकमतयः कल्पनास्तथा तथा तमीश्वरं स्त्रैणादिरूपं मेनिरे इत्यर्थः ३९ इति प्रथमस्कंधे एकादशोऽध्यायः ११ उरोकल्पस्येणायद्दोशिरे

द्रादिविस्तरात् द्वादशेनुतदेवाथपरीक्षिज्जन्मवर्ण्यते १ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं संस्थांचपांडुपुत्राणांवक्ष्येकृष्णकथोदयमितिप्रति
ज्ञापयंउत्तानांराज्यस्थितिंकृपोद्धातभूतांसमसंगसप्रमाध्यापमारभ्यनिरूपिताइदानीमुपोद्धातकथामुक्तानुवादपूर्वकं पृच्छति तस्यजन्मेति उपर

तस्यजन्ममहाबुद्धेःकर्माणिचमहात्मनःनिधनंचयथैवासीत्सप्रेत्यगतवान्यथा २ तदिदं
श्रोतुमिच्छामिगदितुंयदिमन्यसेब्रूहिनः श्रद्दधानानांयस्यज्ञानमदाच्छुकः ३ ३ ३
स्मै

स्तेनविस्तरेण १ तस्यजन्मेत्यादित्रिकं हीन्युत्तरेणान्वयः परीक्षितःप्रेत्यदेहंत्यक्त्वा २ सार्धश्लोकेनत्वाशापयामीत्याह गदितुंयदितुंयदितन्यसे श्रुतयहेणार्हिंमहो
ति यस्मज्ञानमदाच्छुकः इतिश्रवणेच्छायांकारणम् ३ श्रीकृष्ण०

निस्पृहस्यापि ततः श्रीकृष्णानुध्यानात्ताद्दक्पौत्रः समजनीति वक्तुं तस्य श्रीकृष्णैकमतप्रदेकमाह अपीपलदिति त्रिभिः पितृपदं पीपलत् पालयामास ४ क्रतवश्च उपार्जिताः लोकाश्च ५ सुरस्पार्हाः सुराणां स्पृहणीया ये ते तेषां पदार्थाः कामा विषया राज्ञः किं मुदं प्रीतिं जहुः न कृतवंत इत्यर्थः अत्र हेतुः मुकुंदे एव मनो यस्येति क्षुधितस्य अन्नैकमनसः यथान्ये रत्नचंदनादयो न कुर्वंति तद्वत् ६ भृगुनंदन मातुरिति सपरीक्षित् ७ अंगुष्ठमात्रं सुवर्णस्फुरत्पुरटमौलिर्यस्यास्तितं मौल्यादिप्रत्यक्षिति

सूत उवाच अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ४ संपदः क्रतवो लोका महिषी भ्रातरो मही जंबुद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ५ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विज अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ६ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ७ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं ८ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं ९ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः अस्त्रतेजः स्वगदया नीहारमिव गोपतिः १०

इति परस्परं अपीच्यं अतिसुंदरं दृश्यत इति दर्शनं रूपं यस्य तडिद्वाससि पीतवस्त्र इति श्याममिति च पदाभ्यां विद्युद्भूषितमेघोपमानं चितम् अच्युतं अविकारं ८ तप्तं दग्धं शोधितं यत्कांचनं तन्मये कुंडले यस्य क्षतजाक्षं संरंभाद्रक्तनेत्रं अहो मद्भक्तस्यापि गर्भो दह्यत इति भावः ९ अस्त्रतेजो विध्वंसंतं विनाशयंतं नीहारं हिमं

गोपतिः सर्पइवसन्निकर्षेस्वसमीपेददृश दृष्ट्वाचासौकइतिपर्यैक्षतवितर्कितवान् १० अर्भेपात्मा कथंतद्विक्षतवानित्यवितर्केच्छयः धर्मगोप्तानीतिधर्मप्रुश्द
श्मासपरिच्छेद्यस्यतस्यमिषतः पश्यतः यत्रदृष्टः तत्रैवांतर्हितः नान्यत्रगतः यतोविभुः सर्वगतः ११ उदर्केमुत्तरंफलंसर्वगुणानामुत्तरोत्तराधिक्य

विधमंतंसंनिकर्षेपर्यैक्षतकइत्यसौ विधूयतद्मेयात्माभगवान्धर्मगुब्विभुः मिषतोदशमासस्यतत्रैवांतर्दधे
हरिः ११ ततस्सर्वगुणोदर्केसानुकूलग्रहोदये जज्ञेवंशधरः पांडोर्भूयः पांडुरिवौजसा १२ तस्यप्रीतम
नाराजाविप्रैर्धौम्यकृपादिभिः जातकंकारयामासवाचयित्वाचमंगले १३ १३ श्रीकृष्णः० ॥

सत्वकेलये तत्रहेतुः अनुकूलैरस्थैर्ग्रहैः सहितानांशुभग्रहाणामुदयोयस्मिन् १२ जातकंजातकर्ममंगलेपुण्याहवाचनं १३ १३ १३ १३ १३

मूलपंक्तिः ५ ...

मत्तपंक्तिः ५ दशांशविधा ॥ अधिकदशांतः न्यूनदशांतः २ समानदशांतः ३ । तत्र प्रमाणं ब्राह्मे । उणनोभ्याधिको विष्णुर्नष्टो विष्णुस्तथैव च ।
विष्णुजीवस्य दशांतः उनसाम्याधिकाः क्रमात् इति ॥ १३५ भागवततात्पर्ये ॥

क्रान्तस्य स्नातस्य च शोभनमन्नं च तीर्थं वदान्यकालस्तु यावत् छिद्यते नालं तावत् प्राप्नोति सूतकं छिन्ने नाले ततः पश्चात् सूतकं तु विधीयत इति वचनात् ततः पूर्वं प्रा-
तस्यामानत्वा प्रजातीर्थे पुत्रोत्पत्तिरूपपुण्यकाले पुत्रे जाते व्यतीयाते दत्तं भवति चाक्षयमिति श्रुतेः देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां आयांति हि तस्य श्रेष्ठ उपा-
हमिति चाब्रुवन् १४ हे पौरवर्षभ पुरूणां कुरुवंश्यानां १५ शुक्ले शुद्धे अस्मिन् प्रजातंतौ दैवेति अप्रतिघातेन दुर्वारेण संस्थां नाशं उपेयुषि गते सति कथंभू-

हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान् प्रादात् स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टा राजा-
नं प्रश्रयान्वितं एष ह्यस्मिन् प्रजातंतौ पुरूणां पौरवर्षभ १५ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि रातो वोऽनुग्रहार्थाय वि-
ष्णुना प्रभविष्णुना १६ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः भविष्यति न संदेहो महाभागवतो महान् १७
राजोवाच अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः १८ ब्राह्म-
णा ऊचुः पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा १९ १९

ते तव वोऽनुग्रहार्थाय प्रभविष्णुना प्रभवशीलेन श्रीविष्णुना रातो दत्तः १६ तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति महाभागवतश्च गुणोत्कृष्टो महान् भविष्यति नात्र संदेहः इ-
ति तं राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्वयः १७ महाभागवतो भविष्यतीत्युक्ते हृष्टः सन् पृच्छति अपि स्वित् किंस्वित् साधुवादेन यशसा सत्कीर्त्या अनुवर्तिता भ-
